सुभाषित व्याकरण - १९

Subhāṣita Vyākaraṇa - 19

(A compilation of Saṃskṛta well said verses with full grammar and meaning)

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

शुक्रवार चैत्र शुक्ल प्रतिपदा १९४४, शुभकृत संवत्सर

अल्पं किञ्चिच्छ्रियं प्राप्य नीचो गर्वायते लघुः।
पद्मपत्रतले भेको मन्यते दण्डधारिणम् ॥२१६॥

किञ्चित् अल्पम् श्रियम् प्राप्य,नीचः च लघुः च जनः गर्वायते। पद्मपत्रतले (स्थितः) भेकः (स्वयम्) दण्डधारिणम् मन्यते॥

A mean and small person becomes arrogant when hegets little bit of wealth. (Just like) A frog resting under a lotus leaf thinks that he is a holder of a staff of King or a Mendicant (having authority of a king or a mendicant).

नीचः- small, worthless, base, लघुः- little, small, feeble & भेकः- a frog- all in पु. लिं. प्र. वि. ए. व., किञ्चित् (किम्+ चित्)- some, little & अल्पम्- small, little- both in- न. लिं. प्र. वि. ए. व., श्रियम्- स्त्री. लिं. द्वि. वि. ए. व. of श्री- wealth, money, प्राप्य- on getting, after receiving- पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्र+ आप्- to get, receive- (आप्- आप्नोति ५ ग. प. प. to get), गर्वायते- प्रयोजक वर्त. तृ. पु. ए. व. of गर्व्- to get arrogant, become proud- (गर्व्- गर्वति १ ग. प. प. to be proud, haughty), पद्मपत्रतले- पु/न. लिं. स. वि. ए. व. of पद्मपत्रतल- under a lotus leaf- पद्म- न. लिं- lotus, पत्र- न. लिं- leaf, तल- under, below, base- पद्मस्य पत्रम्- पद्मपत्रम् & पद्मपत्रस्य तलम्- पद्मपत्रतलम्- both ष. तत्पुरुष स., दण्डधारिणम्- पु. लिं. द्वि. वि. ए. व. of दण्डधारिन्- holder of the staff- दण्डः/दण्डम्- पु/न. लिं.- stick, staff, scepter of a King or a Mendicant (Sanyasin), धारिन्- holder, bearer- यः दण्डम् धारयति सः - दण्डधारिन्- बहुव्रीही स., or दण्डम् धारयति इति -उपपद तत्पुरुष स. मन्यते- considers, thinks- वर्त. तृ. पु. ए. व. of मन्- ४ ग. आ. प. to think, believe

विद्यैव व्यसनं भवेद् भुवि नृणां ज्ञानं सुवर्णं भवेद्
ग्रन्थस्याध्ययनं भवेद् दिविषदामर्चा च सत्यं तपः।
शीलं रत्नमिहास्तु शम्भुपदयोर्ध्यानं च चिन्तामणि-
र्भाषा भूषणमस्तु सज्जनगृहे वासोऽस्तु नाकस्थितिः ॥२१७॥

नृणाम् भुवि, विद्या एव व्यसनम् भवेत् । ज्ञानम् सुवर्णम् भवेत् ।, ग्रन्थस्य अध्ययनम् च दिविषदाम् अर्चा भवेत् । सत्यम् तपः (भवेत्)। इह शीलम् रत्नम् अस्तु । शम्भुपदयोः ध्यानम् च चिन्तामणिः (अस्तु) । भाषा भूषणम् अस्तु । सज्जनगृहे वासः नाकस्थितिः अस्तु॥

For people in this world, let education be their passion. Let the knowledge be their gold. Let study of books be their God worship. Let practicing the truth be their penance. Let the good character be their jewel. Let meditation on Shiva's feet be their gem that grants all wishes. Let the (good) speech be their decoration. Let staying in the company of noble people be their heavenly experience.

नृणाम् & दिविषदाम्- पु. लिं. ष. वि. ब. व. of नृ- man, a person & दिविषद्- inhabitant of heaven, God- दिव्- स्त्री. लिं- heaven, sky- दिवि इष्यति इति- दिविषद्- स. तत्पुरुष स., भुवि- स्त्री. लिं. स. वि. ए. व. of भू- earth, world, विद्या- knowledge, education, अर्चा- worship, adoration & भाषा- speech, language, talk- all in स्त्री. लिं. प्र. वि. ए. व., व्यसनम्- addiction, passion, ज्ञानम्- expertise, knowledge, सुवर्णम्- gold, अध्ययनम्- study, reading, learning, सत्यम्- truth, तपः (तपस्)- penance, religious austerity, शीलम्- character, behaviour, रत्नम्- jewel, precious stone, ध्यानम्- meditation, thinking, भूषणम्- ornament, decoration- all in न. लिं. प्र. वि. ए. व., भवेद्- विध्यर्थ तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, to exist, ग्रन्थस्य- पु. लिं. ष. वि. ए. व. of ग्रन्थ- literary composition, treatise, अस्तु- आज्ञार्थ तृ. पु. ए. व. of- अस्- अस्ति २ ग. प. प. to be, to exist, शम्भुपदयोः- पु. लिं. ष. वि. द्वि. व. of शम्भुपद- foot of Shiva- शम्भु- Shiva, पद- पु/न. लिं- foot, शम्भोः पदम्- शम्भुपदम्- ष. तत्पुरुष स., चिन्तामणिः- a fabulous gem supposed to yield all desires & वासः- stay- both in पु. लिं. प्र. वि. ए. व., सज्जनगृहे- न. लिं. स. वि. ए. व. of सज्जनगृह- house of a noble person- सत्- noble, good, जन- person, गृह- house abode- सत् जनः- सज्जनः -कर्मधारय स. & सज्जनस्य गृहम्- सज्जनगृहम्- ष. तत्पुरुष स., नाकस्थितिः - heavenly situation- नाक- heaven, sky, स्थितिः- situation, condition- नाकः इव स्थितिः- नाकस्थितिः- विशेषणपूर्वपद कर्मधारय स., एव- alone, just, only, च- and, इह- here, in this world-all अव्ययs

आदित्यस्योदयस्तात ताम्बूलं भारती कथा।
इष्टा भार्या सुमित्रञ्च अपूर्वाणि दिने दिने ॥२१८॥ - पञ्चतन्त्र

तात, आदित्यस्य उदयः, ताम्बूलम्, भारती कथा, इष्टा भार्या (तथा) सुमित्रम् च दिने दिने अपूर्वाणि (भवन्ति) ॥

My Dear, the Sunrise, a betel-leaf with areca nut and other ingredients (पान बीडा), the story of Mahabharat, a loving wife and a good friend continue to remain fresh and new every day.

तात- a term of affection usually applied to children, pupils, junior- पु. लिं. सं. वि. ए. व., आदित्यस्य- पु. लिं. ष. वि. ए. व. of आदित्य- Sun, उदयः- rising, appearance- पु. लिं. प्र. वि. ए. व., ताम्बूलम्- combination of betel-leaf, areca-nut and other ingredients (पान बीडा) & सुमित्रम्- a good friend- मित्रम्- न. लिं- friend- सुभगम् मित्रम्- सुमित्रम्- समा. प्रादितत्पुरुष स.- both in न. लिं. प्र. वि. ए. व., भारती- belonging to Bharat (Mahabharat), कथा- story, इष्टा- desirable, wanted, loving- (इष्ट- क. भू. धा. वि. of इष्- इच्छति ६ ग. प. प. to desire, to be wanted, भार्या- wife- all-in स्त्री. लिं. प्र. वि. ए. व., दिने- न. लिं. स. वि. ए. व. of दिनम्-day, दिने

दिने- everyday, अपूर्वाणि- न. लिं. प्र. वि. ब. व. of अपूर्व- not preceded, not having existed before, extraordinary- पूर्व- that existed before, earlier- न पूर्वम्- अपूर्वम्- नञ् तत्पुरुष स.,

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां दूरं यान्ति विनायकाः ॥२१९॥

महताम् अपि श्रेयांसि बहुविघ्नानि भवन्ति। अश्रेयसि प्रवृत्तानाम् विनायकाः (अपि) दूरम् यान्ति॥

Even great people encounter numerous hurdles while performing virtuous deeds. (However), for those involved in a disgraceful deed, even the obstacles run away!

महताम् & प्रवृत्तानाम्- पु. लिं. ष. वि. ब. व. of महत्- great, noble, virtuous & प्रवृत्त- involved, engaged- (क. भू. धा. वि. of प्र +वृत्- to be involved, engaged- वृत्- वर्तते १ ग. आ. प. to be), श्रेयांसि & बहुविघ्नानि- both in न. लिं. प्र. वि. ब. व. of श्रेयस्- adjectv- superior, most excellent, virtuous & बहुविघ्नम्- many hurdle, numerous obstacle- बहु- adjctv- many, numerous विघ्नम्- impediment, hurdle, obstacle -बहु विघ्नम्- बहुविघ्नम्- कर्मधारय स., अश्रेयसि- न. लिं. स. वि. ए. व. of अश्रेयस्- bad, disgraceful, unworthy- न श्रेयस्- अश्रेयस्- नञ् तत्पुरुष स., भवन्ति & यान्ति- वर्त. तृ. पु. ब. व. of भू-भवति १ ग. प. प. to be, to exist, to occur & या- याति २ ग. प. प. to go, proceed, विनायकाः- - पु. लिं. प्र. वि. ब. व. of विनायक- impediment, hurdle, obstacle, (also remover of obstacles, Shri Ganesh) दूरम्- to a distance, far away, अपि- अव्यय- also, even

शिष्यश्चेदिह बुद्धिमान् प्रतिभया युक्तश्च तर्के पटु-
नेर्ष्यां सन्दधतां कदापि गुरवस्तस्मै विशिष्टात्मने।
प्रोत्साह्यस्तरुणो दिगन्तगमने कीर्त्यर्जने साधने
साध्यं यन्न गुरोः स साधयति चेच्छिष्यो यशस्तद्गुरोः॥२२०॥

शिष्यः चेद् इह बुद्धिमान्, प्रतिभया युक्तः, तर्के पटुः च (अस्ति), गुरवः तस्मै विशिष्टात्मने कदापि ईर्ष्याम् न सन्दधताम्। (सः) तरुणः दिगन्तगमने, कीर्त्यर्जने साधने (गुरुभिः) प्रोत्साह्यः (भवति)। सः शिष्यः, चेद् यद् गुरोः न साध्यम् साधयति, तद् गुरोः यशः (भवति)॥

Teachers should never be jealous of that extraordinary disciple who is intelligent, endowed with talent and proficient in logical reasoning. That young man should be encouraged to visit far off places, to accomplish his goals and to earn fame. It is indeed the success of the teacher, when that pupil accomplishes those goals, which were achieved by the teacher.

शिष्यः- pupil, disciple, बुद्धिमान् (बुद्धिमत्)- endowed with understanding, intelligent, तरुणः- youth, young man, युक्तः- endowed with, possessing -(युक्त- क. भू. धा. वि. of युज्- युनक्ति- युंक्ते ७ ग. उ. प. to endow with, to harness), पटुः- expert, well versed, proficient, सः (तद्)- he & प्रोत्साह्यः- to be encouraged- प्रयोजक कर्मणि वि. धा. सा. वि. of प्र+ उद्+ सह्- सहायति- ते- (सह्- सहते- १ ग. प. प. to bear, allow)- all in पु. लिं. प्र. वि. ए. व., प्रतिभया- स्त्री. लिं. तृ. वि. ए. व. of प्रतिभा- talent, intelligence, तस्मै & विशिष्टात्मने- in पु. लिं. च. वि. ए. व. of तद्-he & विशिष्टात्मन्- extraordinary person, unique man- विशिष्ट- unique, extraordinary, distinguished- (विशिष्ट- क. भू. धा. वि. of वि+ शिष्- to surpass, exceed- शिष्- शेषति १ ग. प. प. to remain, spare), आत्मन्- self, soul, विशिष्टः आत्मा यस्य सः- विशिष्टत्मन्- बहुव्रीही स., दिगन्तगमने, कीर्त्यर्जने, साधने & तर्के- स. वि. ए. व. of- दिगन्तगमन- going to the end of the globe- दिग्- न. लिं- cardinal point, direction- (दिश्- स्त्री. लिं.)- अन्त-end- दिगः अन्तम्- दिगन्तम्- end of the horizon, far far off- ष. तत्पुरुष स., गमन- going, दिगन्ते गमनम्- दिगन्तगमनम्- स. तत्पुरुष स., कीर्त्यर्जन- earning of fame, glory- कीर्तिः- स्त्री. लिं.- fame, glory, अर्जन- acquisition, getting- कीर्तेः अर्जनम्- कीर्त्यर्जन -ष. तत्पुरुष स., साधन- accomplishing, performance & तर्क- logic, abstract reasoning, गुरवः - प्र. वि. ब. व. & गुरोः- ष. वि. ए. व. of गुरु- पु. लिं.- teacher, elder, father, ईर्ष्याम्- स्त्री. लिं. द्वि. वि. ए. व. of ईर्ष्या- envy, jealousy, सन्दधताम्- आज्ञार्थ तृ. पु. ब. व. of सं+ धा- to hold out against, cause, यशः (यशस्)- न. लिं- success, fame, glory, यद्-which, what, तद् कदापि- never- all अव्ययs

अर्थेभ्यो हि विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः॥२२१॥ रामायण युद्धकाण्ड

अर्थेभ्यः ततः ततः संवृत्तेभ्यः (तथा) विवृद्धेभ्यः हि, सर्वाः क्रियाः, पर्वतेभ्यः आपगाः इव, प्रवर्तन्ते ॥

By collecting wealth from here and there and (then) by growing it, all projects are indeed accomplished, like rivers originating from a mountain,

अर्थेभ्यः, संवृत्तेभ्यः, पर्वतेभ्यः & विवृद्धेभ्यः- all in तृ. वि. ब. व. of अर्थ- object, purpose, aim, wealth, money, संवृत्त- furnished, collected, accomplished- क. भू. धा. वि. of सं+ वृत्- to furnish, collect- (वृत्- वर्तते १ ग. आ. प. to become, to be), पर्वत- mountain, hill & विवृद्ध- developed, augmented- क. भू. धा. वि. of वि+ वृध्- to develop, augment- (वृध्- वर्धते १ ग. आ. प. to grow, increase), आपगाः सर्वाः & क्रियाः- स्त्री. लि. प्र. वि. ब. व. of आपगा- river, stream -(आपस्- न. लिं.- water- आपांसि गमयति इति- आपगा- उपपद तत्पुरुष स., सर्व- adjctv- all, entire & क्रिया- action, deed, work, प्रवर्तन्ते- वर्त. तृ. पु. ब. व. प्र+ वृत्- get accomplished, happen- (वृत्- see above), ततः (ततस्)- from that, then, thereupon & ततः ततः- here and there, to and fro, इव- like, similar to, हि- indeed, surely- all अव्ययs,

विद्वद्भिर्न कदापि राजसविधे श्रीमन्निवासेऽथवा
स्थातव्यं स्वशिरोवनम्य कृतकं कुर्वद्भिरीषत्स्मितम्
विद्याया अवमानना खलु गिरां देव्या अवज्ञा तथा
यद्वैधेयजनाश्रये स्वकवलं सम्पादयेत्पण्डितः॥२२२॥

विद्वद्भिः, राजसविधे अथवा श्रीमन्निवासे, स्वशिरः अवनम्य, कृतकम् ईषत्स्मितम् कुर्वद्भिः न कदापि स्थातव्यम्। तथा पण्डितः यद् वैधेयजनाश्रये स्वकवलम् सम्पादयेत् (तद्) विद्यायाः अवमानना खलु गिराम् देव्याः अवज्ञा (भवति) ॥

Scholars should never stand with their head bowed and with a false smile on their face in the Royal court or in the mansions of wealthy people. If, a scholar earns his livelihood in this submissive manner, from foolish people, that is an insult to his scholarship and also disrespect to the Goddess of Knowledge

विद्वद्भिः & कुर्वद्भिः- पु. लिं. तृ. वि. ब. व. of विद्वस्- learned, scholar, wise & कुर्वत्- doing- वर्त. का. वा. धा. सा. वि. of कृ-करोति- कुरुते ८ ग. उ. प. प. to do, राजसविधे, श्रीमन्निवासे & वैधेयजनाश्रये- all in स. वि. ए. व. of -राजसविध- royal presence- राजन्-king, सविधम्- presence, proximity- राज्ञः सविधम्- राजसविधम्, श्रीमन्निवास- wealthy person's house- श्रीमत्- wealthy, rich, resourceful, निवास- house, abode- श्रीमतः निवासः- श्रीमन्निवास- both ष. तत्पुरुष स. & वैधेयजनाश्रय- under protection of foolish people- वैधेय- adjctv- fool, idiot, silly, जन-people, आश्रय- protection, dependence- वैधेयः जनः- वैधेयजनः- कर्मधारय स. & वैधेयजनस्य आश्रयः- वैधेयजनाश्रय- ष. तत्पुरुष स., स्वशिरः- one's own head- स्व- one's own, शिरस्- न. लिं- head- स्वस्य शिरः- स्वशिरः- ष. तत्पुरुष स. & पण्डितः- scholar, learned man- both in पु. लिं. प्र. वि. ए. व., अवनम्य- by bowing- पू. का. वा. धा. सा. ल्यबन्त अव्यय of अव+ नम्- to stoop, bow down- (नम्- नमति- १ ग. प. प. to bow), कृतकम्, ईषत्स्मितम् & स्वकवलम् - all in न. लिं. द्वि. वि. ए. व. of कृतक- false, artificial, ईषत्स्मित- smiling little- ईषत्- अव्यय- little, slight, स्मित- smile- क. भू. धा. वि. of स्मि- स्मयते १ ग. आ. प. to smile- स्मितम् ईषत्कृत्य- ईषत्स्मितम्- अव्ययीभाव स. & स्वकवलम्- one's own food, living- स्व- one's own, कवलम्- food, स्वस्य कवलम्- स्वकवलम्- ष. तत्पुरुष स., स्थातव्यम्- to remain, to be staying- स्थातव्य- also स्थानीय & स्थेय- भावे विध्यर्थ धा. सा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand, सम्पादयेत्- विध्यर्थ तृ. पु. ए. व. of सं+पद्- सम्पादयति- ते- to earn- (पद्-पद्यते ४ ग. आ. प. to get, reach) विद्यायाः, गिराम् & देव्याः- all in स्त्री. लिं. ष. वि. ए. व. of विद्या- knowledge, education, गिर्- speech, words, language & देवी- goddess, अवज्ञा & अवमानना- disrespect, insult- स्त्री. लिं. प्र. वि. ए. व., अथवा-or, and, खलु- indeed, surely, न- no, not, कदा- when, अपि- also, even- कदा+ अपि- कदापि- sometimes, न कदापि-never, यद्- if, in case, तथा- by that, like that- अव्ययs

आकाशे विहगाश्चरन्ति बहवः सर्वे समाना न ते
किं काका विनतासुतेन तुलनामर्हन्ति पक्षित्वतः।
एकस्यास्ति गतिः पयोदसरणौ देवाश्रितायां भृशं
भूमौ विक्षतदेहमांसशकलेभ्योऽन्ये रणं कुर्वते ॥२२३ ॥

आकाशे बहवः विहगाः चरन्ति, (किन्तु) ते सर्वे न समानाः (सन्ति)। किम् काकाः विनतासुतेन पक्षित्वतः तुलनाम् अर्हन्ति? एकस्य देवाश्रितायाम् पयोदसरणौ भृशम् गतिः अस्ति। अन्ये भूमौ विक्षतदेहमांसशकलेभ्यः रणम् कुर्वते॥

There are plenty of birds flying in the sky but they are not all equal! Do the crows deserve a comparison of a fine bird with celestial Garuda? For the one, (Garuda, the quality of a great bird) is fast moving amidst the range of clouds and the abodes of celestial beings and for the other (crow), it is fighting on earth over pieces of flesh of a dead body.

आकाशे- पु/न. लिं. स. वि. ए. व. of आकाश- sky, बहवः, विहगाः, समानाः, काकाः, ते, सर्वे, अन्ये - all in पु. लिं. प्र. वि. ब. व. of बहु- adjctv- many, plenty, lot, विहग- bird- विहायस्- पु. लिं.- sky- विवायसं गच्छति इति- विहगः, द्वि. उपपद तत्पुरुष स., समान- adjctv- same, equal, similar, काक- crow, ते- they- (तद्- he), सर्व- all, entire, अन्य- adjctv- other, different, another & कुर्वते - आ. प. वर्त. तृ. पु. ब. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, चरन्ति & अर्हन्ति- वर्त. तृ. पु. ब. व. of चर्- चरति १ ग. प. प. to walk, move, roam & अर्ह् - अर्हति- १ ग. प. प. to deserve, merit, विनतासुतेन- पु. लिं. तृ. वि. ए. व. of विनतासुत- son of Vinata, celestial bird Garuda- विनता- wife of Kashyap-rushi- विनतायाः सुतः -विनतासुतः- ष. तत्पुरुष स., पक्षित्वतः- ष. वि. ए. व. of पक्षित्वत्- quality of fine bird- पक्षिन्- bird, त्वत्- suffix implies quality, तुलनाम्- स्त्री. लिं. .द्वि. वि. ए. व. of तुलना- comparison, rating, एकस्य- पु. लिं. ष. वि. ए. व. of एक- one, single, देवाश्रितायाम्, पयोदसरणौ & भूमौ - स्त्री. लिं. स. वि. ए. व. of देवाश्रिता- inhabited by Gods- देव- God, आश्रित- inhabited, dependent- क. भू. ध. वि. of आ+ श्रि- to seek refuge, inhabit- (श्रि- श्रयति- ते १ ग. उ. प. to go to, resort to)- देवैः आश्रिता- देवाश्रिता- तृ. तत्पुरुष स., पयोदसरणि- course of clouds- पयोद- cloud- पयस्- न. लिं. -water- पयं ददाति इति -पयोदः - द्वि. उपपद तत्पुरुष स., सरणिः-स्त्री. लिं.- course, line & पयोदानाम् सरणिः- पयोदसरणिः- ष. तत्पुरुष स. & भू- earth, land, गतिः - movement, course- स्त्री. लिं. प्र. वि. ए. व., विक्षतदेहमांसशकलेभ्यः -च. वि. ब. व. of विक्षतदेहमांसशकल- piece of flesh of torn off body- विक्षत- torn, cut off- क. भू. ध. वि. of वि+ क्षण्- क्षणोति- क्षणुते ८ ग. उ. प. to break to pieces, tear, देह- body, मांस- flesh, शकल- piece, part- विक्षतम् देहम्- विक्षतदेहम्- कर्मधारय स., विक्षतदेहस्य मांसम्- विक्षतदेहमांसम् & विक्षतदेहमांसस्य शकलम्- विक्षतदेहमांसशकलम्- both- ष. तत्पुरुष स., रणम्- fighting, quarrelling- न. लिं. प्र. वि. ए. व.,

अस्ति- वर्त. तृ. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, भृशम्- exceedingly, very much, न- no, किम्- particle of interrogation- why- all अव्ययs

यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु।
तस्य ज्ञानेन मोक्षेण किं जटाभस्मलेपनैः ॥२२४॥ -चाणक्यनीतिदर्पण अ-१५ श्लो. १

यस्य चित्तम् सर्वजन्तुषु कृपया द्रवीभूतम् (अस्ति) तस्य ज्ञानेन, मोक्षेण (तथा) जटाभस्मलेपनैः किं (प्रयोजनम् भवति)?

For the noble person whose heart melts with compassion for all living beings, what is the use of any other knowledge, liberation from birth death cycles or being an ascetic with matted hair and holy ash all over the body?

यस्य- whose & तस्य- his, to him पु. लिं. ष. वि. ए. व. of यद्-who & तद्- he, चित्तम्- mind, heart & द्रवीभूतम्- melted, softened- (द्रव- fluid, wet, oozing- द्रवीभू-च्वि रूप- to melt, melted -as with pity- द्रवीभूत- क. भू. धा. वि. of द्रवीभू- भू-भवति १ ग. प. प. to be, to exist)- both in न. लिं. प्र. वि. ए. व., सर्वजन्तुषु- पु. लिं. स. वि. ब. व. of सर्वजन्तु- entire living beings- सर्व- all, entire & जन्तु- living being, creature, सर्वः जन्तुः -सर्वजन्तुः - कर्मधारय स., कृपया- स्त्री. लिं. तृ. वि. ए. व. of कृपा- compassion, pity, tenderness, ज्ञानेन & मोक्षेण- न. लिं. तृ. वि. ए. व. of ज्ञान- & मोक्ष- liberation, deliverance, emancipation, जटाभस्मलेपनैः- न. लिं. तृ. वि. ब. व. of जटाभस्मलेपन- matted hair and anointment of holy ash over the body- जटा- matted hair, भस्म- holy ash, लेपन- anointment- भस्मस्य लेपनम्- भस्मलेपनम्- ष. तत्पुरुष स. & जटा च भस्मलेपनम् च- जटाभस्मलेपनम्-द्वंद्व स., किम्- a particle of interrogation- what use, what purpose

हरणं च परस्वानां परदाराभिमर्शनम्।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः॥२२५॥ - महाभा विदुरनीति ७०.१

त्रयः दोषाः - परस्वानाम् हरणम्, परदाराभिमर्शनम् च सुहृदः च परित्यागः - क्षयावहाः (भवन्ति) ॥

These three wrong deeds lead to (self) destruction: stealing others' property, desiring another person's wife and deserting of a good friend.

परस्वानाम्- न. लिं. ष. वि. ब. व. of परस्वम्- another's property, हरणम्- usurping, stealing- (हृ- हरति १ ग. प. प. to take away, steal), परदाराभिमर्शनम्- adultery- पर- adjctv- other, another, दारा- wife, अभिमर्शनम्- assault, outraging, seducing , परस्य दारा- परदारा & परदाराणाम् अभिमर्शनम्- परदाराभिमर्शनम्- outraging modesty of the other's wife- both- ष. तत्पुरुष स.- both in न. लिं. प्र. वि. ए. व., सुहृदः- पु. लिं. ष. वि. ए. व. of सुहृद्- having a kind

heart, a friend- सुभगः हृद् यस्य सः- सुहृद्- बहुव्रीही स., परित्यागः- leaving, deserting- पु. लिं. प्र. वि. ए. व., त्रयः दोषाः & क्षयावहाः - पु. लिं. प्र. वि. ब. व. of त्रि- three, दोष- sin, fault, wrong deed, & क्षयावह- destructive, ruining- क्षय- loss, decay, ruin, वह- carrying- क्षयाय वाहयति इति- क्षयावह- चतुर्थी उपपद तत्पुरुष स.

हंसो विभाति नलिनीदलपुञ्जमध्ये
सिंहो विभाति गिरिगह्वरकन्दरासु।
जात्यो विभाति तुरगो रणयुद्धमध्ये
विद्वान्विभाति पुरुषेषु विचक्षणेषु॥२२६॥ - सुभाषित रत्न भाण्डागारं

हंसः नलिनी-दल-पुञ्ज-मध्ये विभाति । सिंहः गिरि-गह्वर-कन्दरासु विभाति। जात्यः तुरगः रण-युद्ध-मध्ये विभाति । (तथा) विद्वान् विचक्षणेषु पुरुषेषु विभाति॥

A swan looks splendid in well-blossomed lotus-pond. A lion looks majestic in the mountains, caves and valleys. A well- bred horse gives outstanding performance in a war in the battlefield. A scholar shines among the company of learned people.

हंसः- swan, सिंहः- lion, जात्यः- well-bred, well-born- (जात- born, produced- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born, produced), तुरगः- horse, विद्वान् (विद्वस्)- learned man, wise, scholar- all in- पु. लिं. प्र. वि. ए. व., नलिनीदलपुञ्जमध्ये & रणयुद्धमध्ये- स. वि. ए. व. of नलिनीदलपुञ्जमध्य- amidst multitudes of lotus flowers- नलिनी- lotus, दल- petal, blade, heap, quantity, multitude, पुञ्ज- heap, quantity, multitude, मध्य- amidst, among, in the company of- नलिन्याः दलम्- नलिनीदलम्- नलिनीदलानाम् पुञ्जम्- नलिनीदलपुञ्ज & नलिनीदलपुञ्जस्य मध्यम्- नलिनीदलपुञ्जमध्यम्- all ष. तत्पुरुष स. & रणयुद्धमध्य- amidst raging war in the battle field- रण- battle field, युद्ध- war, fight & मध्य- amidst, रणे युद्धम्- रणयुद्धम्- स. तत्पुरुष स. & रणयुद्धस्य मध्यम्- रणयुद्धमध्यम्- ष. तत्पुरुष स., गिरिगह्वरकन्दरासु, विचक्षणेषु & पुरुषेषु- स. वि. ब. व. of गिरिगह्वरकन्दर- mountain, cave a valley- गिरि- पु. लि.- mountain, hill, गह्वर- न. लिं-cave, inaccessible place, कन्दर- पु/न. लिं-valley- गिरिः च गह्वरम् च कन्दरम् च- गिरिगह्वरकन्दरम्- द्वंद्व स., विचक्षण- wise, clever, learned & पुरुष-पु. लि.- man, person, विभाति- वर्त. तृ. पु. ए. व. of वि+भा- to shine brilliantly, look outstanding -(भा-भाति २ ग. प. प. to appear, shine)

सूनृतं सर्वशास्त्रार्थनिश्चितज्ञानशोभितम्।
भूषणं सर्ववचसां लज्जेव कुलयोषिताम् ॥२२७॥ - सुभाषित रत्न भाण्डागारं

सूनृतम्, सर्व-शास्त्र-अर्थ-निश्चित-ज्ञान- शोभितम्, सर्ववचसाम् भूषणम् (भवति), कुलयोषिताम् (अथवा सर्वयोषिताम्) लज्जा इव ॥

A speech, based on truth, science, logic and definite meaning is as graceful as the modesty of noble (or all) women.

सूनृतम्- true and agreeable speech, सर्वशास्त्रार्थनिश्चितज्ञानशोभितम्- agreeable speech, graced by all scientific knowledge, understanding and definite meaning- सर्व- adjctv- all, entire, शास्त्र- any department of knowledge, science, precept, अर्थ- meaning, purpose, निश्चित- ascertained, defined- क. भू. धा. वि. of निस्+ चि- to define, resolve- (चि- चिनोति- ते ५ ग. उ. प. to collect, gather), ज्ञान- knowledge, understanding, शोभितम्- graced, adorned- (शोभित- क. भू. धा. वि. of शुभ्- शोभते- १ ग. आ. प. to shine, befit, be splendid) & भूषणम्- graceful, decoration, adornment- all in न. लिं. प्र. वि. ए. व., सर्ववचसाम्- न. लिं. ष. वि. ब. व. of सर्ववचस्- all talks, every speech- वचस्- न. लिं.- speech, talk- सर्वम् वचः- सर्ववचस्- कर्मधारय स., कुलयोषिताम् & सर्वयोषिताम्- स्त्री. लिं. ष. वि. ब. व. of कुल योषिता, कुल-race, family, noble decent, योषिता- young woman, girl- या योषिता कुले जाता सा- बहुव्रीहि स. & सर्वयोषिता-all ladies- सर्व- all, entire- सर्वा योषिता- सर्वयोषिता - कर्मधारय स., लज्जा- modesty, bashfulness- स्त्री. लिं. प्र. वि. ए. व., इव- अव्यय- like, similar to

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ॥२२८॥ -- महाभा. विदुरनीति

न्यायागतस्य द्रव्यस्य द्वौ अतिक्रमौ बोद्धव्यौ (भवतः) । (प्रथमा अतिक्रमा) अपात्रे प्रतिपत्तिः (भवति) च, (द्वितीयं अतिक्रमं) पात्रे च अप्रतिपादनम् (भवति)॥

Two improper dispositions for the duly aquired wealth should be understood. (The first is) to bestow it on a worthless person or cause and (the second is) not to give the same to a deserving person or cause.

न्यायागतस्य & द्रव्यस्य- ष. वि. ए. व. of न्यायागत- earned by fair means- न्याय- fair, law, justice, आगत- arrived, acquired- क. भू. धा. वि. of आ+ गम्- to arrive, come- (गम्- गच्छति १ ग. प. प. to go)- न्यायेन आगतम्- न्यायागतम्- तृ. तत्पुरुष स. & द्रव्य- (also द्रवणीय & द्रवितव्य)- wealth, property, fit or suitable object- कर्मणि वि. धा. सा. वि. of द्रु- द्रवति १ प. प. to flow, द्वौ, अतिक्रमौ & बोद्धव्यौ- पु. लिं. प्र. वि. द्वि. व. of द्वि- two, अतिक्रम- breach, disrespect, violation- अति- अव्यय- very, exceedingly excessively, क्रम- step, course, order- अतिक्रान्तः क्रमः - अतिक्रमः - अव्यय पूर्वपद कर्मधारय स. & बोद्धव्य- to be understood, known- (also बोधनीय & बोध्य)- कर्मणि वि. धा. सा. वि. To be of बुध्- बुध्यते ४ ग. आ. प. to understand, know, अपात्रे & पात्रे- स. वि. ए. व. of अपात्र- unfit recipient, undeserving person & पात्र- fit recipient, worthy person- न पात्रम् - अपात्रम्- नञ् तत्पुरुष स., प्रतिपत्तिः- getting, receiving- स्त्री. लिं. प्र. वि. ए. व.- (प्रति+ पद्- to receive, gain- ४ ग.

आ. प.), अप्रतिपादनम्- not receiving, not getting- न. लिं. प्र. वि. ए. व.- प्रतिपादन- granting, bestowing- न प्रतिपादनम्- अप्रतिपादनम्- नञ् तत्पुरुष स.

रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः।
एते परोपकाराय युगे दैवेन निर्मिताः ॥२२९॥ - सुभाषित रत्न भाण्डागारं

युगे, रविः, चन्द्रः, घनाः, वृक्षाः, नदी, गावः, सज्जनाः च एते परोपकाराय दैवेन निर्मिताः (भवन्ति)॥

In this lifetime of creation, the Sun, Moon, clouds, trees, river, cattle and noble people are created by the Divine Creator for the benevolence (of all living beings).

युगे- न. लिं. स. वि. ए. व. of युग- age, measure of period, रविः- Sun & चन्द्रः- Moon- both in पु. लि. प्र. वि. ए. व., घनाः, वृक्षाः, सज्जनाः, निर्मिताः & एते (these)- all in पु. लि. प्र. वि. ब. व. of घन- cloud, वृक्ष- tree, सज्जन- noble or good person- सत्- good, noble, जन-people, person- सत् जन- सज्जन- कर्मधारय स., निर्मित- created, produced- क. भू. धा. वि. of निस्+ मा- to produce, create- (मा- माति २ ग. प. प. to measure, compare) & तद्- he, this, नदी -river- स्त्री. लि. प्र. वि. ए. व., गावः- पु/स्त्री. लि. प्र. वि. ब. व. of गो- bull/ox and also cow, परोपकाराय- च. वि. ए. व. of परोपकार- helping others, doing favour- पर- other, another & उपकार- obligation, helping- पराय उपकारम्- परोपकारम्- च. तत्पुरुष स., दैवेन- पु. लिं. तृ. वि. ए. व. of दैव- belonging to God, creation of God

विवेकिनमनुप्राप्ता गुणा यान्ति मनोज्ञताम्।
सुतरां रत्नमाभाति चामीकरनियोजितम् ॥२३०॥- चाणक्य नीती

अनुप्राप्ताः गुणाः, विवेकिनम्, मनोज्ञताम् यान्ति। चामीकरनियोजितम् रत्नम् सुतराम् आभाति॥

Noble qualities developed by a person lead to good discretion and graceful behaviour. A gem placed in a gold setting appears exceedingly beautiful.

गुणाः & अनुप्राप्ताः- both in पु. लिं. प्र. वि. ब. व. of गुण- virtue, quality & अनुप्राप्त- received, reached, got- क. भू. धा. वि. of अनु+प्र+ आप्- to get, reach- (आप्- आप्नोति ५ ग. प. प. to obtain, attain), विवेकिनम्- पु. लिं. द्वि. वि. ए. व. of विवेकिन्- a person with judgement, discrimination, discretion, मनोज्ञताम्- स्त्री. लिं. द्वि. वि. ए. व. of मनोज्ञता- beauty, grace, pleasing appearance- (मनस्- mind, perception, ज्ञ-adjctv- familiar with, knowing- मनस् +ज्ञ- मनोज्ञ), यान्ति- वर्त. तृ. पु. ब. व. of या- यति- २ ग. प. प. to go, to get, to come to, चामीकर- न. लिं.- gold, नियोजित- placed, joined with- क. भू. धा. वि. of प्रयोजक of नि+ युज्- नियोजयति-ते- (युज्- यनक्ति-युंक्ते- ७ ग. उ. प. to join, connect, endow with)- चामीकरेण

नियोजितम्- चामीकरनियोजितम्- studded in gold- तृ. तत्पुरुष स. & रत्नम्- gem, jewel, precious stone- both in न. लिं. प्र. वि. ए. व., आभाति- वर्त. तृ. पु. ए. व. of आ+ भा- to blaze, appear splendid- (भा- भाति- २ ग. प. प. to shine, appear), सुतराम्- अव्यय- exceedingly, very much, excessively

सौन्दर्येण मयूर नास्ति सदृशः कश्चिद्विहङ्गस्तव
स्कन्दस्त्वामकरोत् स्ववाहनमतस्तत्पूजया पूज्यसे।
केका ते मधुरा नापि डयसे व्योम्नि स्वयं तार्क्ष्यवत्
स्तौति त्वां जनता तथापि न गुणा रूपं प्रियं देहिनाम् ॥२३१॥

मयूर, सौन्दर्येण न कश्चित् विहङ्गः तव सदृशः अस्ति। स्कन्दः त्वाम् स्ववाहनम् अकरोत् अतः तत्पूजया (त्वम् अपि मनुष्येण) पूज्यसे। ते केका मधुरा न (अस्ति)। (त्वम्) स्वयम् व्योम्नि तार्क्ष्यवत् न अपि डयसे। तथापि जनता त्वाम् स्तौति। देहिनाम् रूपम् प्रियम् (भवति), (किंतु) न गुणाः ॥

Oh, Peacock, no bird is comparable to you in beauty. As Lord Skanda has made you his vehicle, you are worshipped when he is worshipped. But your voice is not at all melodious, nor you are able fly in sky, yourself, like the celestial Eagle. Even then, people praise you! (Alas), the mortals value one's appearance and not the qualities.

मयूर- Oh, Peacock- पु. लिं. सं. वि. ए. व., सौन्दर्येण- in beauty- तृ. वि. ए. व. of सौन्दर्य- beauty, appearance, कश्चित्- (कः चित्)- someone- न कश्चित्- none, विहङ्गः- bird- विहायस्- sky- विहायसि गच्छति इति- विहङ्गः- उपपद तत्पुरुष स., स्कन्दः- Shiva's son, Shanmukha, सदृशः - looking like, same- समानः दृश्यते इति- सदृशः- उपपद तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., तव & ते - yours- ष. वि. ए. व. of युष्मद्- you, अस्ति & स्तौति- both वर्त. तृ. पु. ए. व. of अस्- २ ग. प. प. to be, to exist & स्तु- २ ग. प. प. to praise, extol, glorify, त्वाम् & स्ववाहनम्- both द्वि. वि. ए. व. of युष्मद्- you & स्ववाहन- own vehicle- स्व- one's own, self, वाहन- vehicle- स्वस्य वाहनम्- स्ववाहनम्- ष. तत्पुरुष स., अकरोत्- अनद्यतन भूत. तृ. पु. ए. व. of कृ- करोति - कुरुते ८ ग. उ. प. to do, make, तत्पूजया- स्त्री. लिं. तृ. वि. ए. व. of तत्पूजा- that worship- पूजा- worship, तस्य पूजा- तत्पूजा- ष. तत्पुरुष स., पूज्यसे- कर्मणि प्रयोग वर्त. द्वि. पु. ए. व. of पूज्- पूजयति- ते १० ग. उ. प. to worship, केका- call of a peacock, मधुरा- sweet, melodious, व्योम्नि- न. लिं. स. वि. ए. व. of व्योमन्- sky, space, तार्क्ष्यवत्- like a Garuda- तार्क्ष्यः- epithet of Garuda- celestial eagle- वत्- suffix implies: 'like', 'similar to', डयसे- वर्त. द्वि. पु. ए. व. of डी- डयते- ४ ग. आ. प. to fly, जनता- mankind, number of people, देहिनाम्- पु. लिं. ष. वि. ब. व. of देहिन्- living being, human, गुणाः- पु. लिं. प्र. वि. ब. व. of गुण- quality, virtue, रूपम्- appearance, form & प्रियम्- beloved, preferred one- both- न. लिं. प्र. वि. ए. व., अतः (अतस्)- therefore, स्वयम्- by oneself, of one's own, न अपि- not even, तथापि- even then- all अव्ययs

अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः।
सेवितव्यं मध्यभागेन राजा वह्निर्गुरुः स्त्रियः॥२३२॥ चाणक्यनीतिदर्पण- अ. १४, श्लो. ११,

राजा, वह्निः, गुरुः (तथा) स्त्रियः, अत्यासन्नाः विनाशाय (कारणम् भवति)। (ते) दूरस्थाः न फलप्रदाः (भवन्ति) । (ते) मध्यभागेन सेवितव्यम् (सन्ति)।

Staying too close to a King, fire, teacher and women, is dangerous (disastrous). However, staying away from them will not yield any benefit either! They should be attended to from moderate distance (for the best gains).

राजा, वह्निः & गुरुः-all in पु. लिं. प्र. वि. ए. व., स्त्रियः- स्त्री. लिं. प्र. वि. ब. व. of स्त्री- woman, female, अत्यासन्नाः, दूरस्थाः & फलप्रदाः - पु. लिं. प्र. वि. ब. व. of अत्यासन्न- staying in too much proximity, stayed very close- क. भू. धा. वि. of अति+ आ+ सद्- (सद्- सीदति १ ग. प. प. to sit, lie, live), दूरस्थ- keeping distance, staying far away- दूर- far way- दूरे तिष्ठति इति- दूरस्थः- उपपद तत्पुरुष स. & फलप्रद- yielding result, fruitful- फलम्- fruit, प्रद- giving- फलम् प्रदाति इति- फलप्रद- उपपद तत्पुरुष स., विनाशाय- for disaster, ruin- च. वि. ए. व. of विनाश- disaster, मध्यभागेन- तृ. वि. ए. व. of मध्यभाग- by middle path- मध्य- middle, centre, भाग- part, portion, position- मध्यः भागः - मध्यभागः - कर्मधारय स., सेवितव्यम्- to be served, attended to- (also सेवनीय & सेव्य)- कर्मणि वि. धा. सा. वि. of सेव्-सेवते- १ ग. आ. प. to serve, attend to, न- no, not

पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम्।
ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ॥२३३॥ -महाभा. विदुरनीति ५.२०४७

पञ्चेन्द्रियस्य मर्त्यस्य, एकम् इन्द्रियम् छिद्रम् चेद्, ततः अस्य प्रज्ञा, दृतेः (छिद्रम्) पात्रात् उदकम् इव, स्रवति॥

The intelligence of a mortal endowed with five sense organs, drains out like water from the hole of a container, even if any one organ becomes defective,

मर्त्यस्य, पञ्चेन्द्रियस्य, अस्य (his) & दृतेः- all in पु. लिं. ष. वि. ए. व. of- मर्त्य- mortal, a human being, पञ्चेन्द्रियः- one who has five sensory organs, पञ्चन्- five, इन्द्रियम्- an organ of sense- पञ्चाणि इन्द्रियाणि यस्य सः- पञ्चेन्द्रियः- बहुव्रीही स. & इदम्- he & दृतिः- leather bag for holding water, एकम्- one, इन्द्रियम्- an organ of sense, छिद्रम्- hole, crack, a defect, blemish, उदकम्- water- all in न. लिं. प्र. वि. ए. व., प्रज्ञा- स्त्री. लिं. प्र. वि. ए. व.- Intelligence, understanding, wisdom, पात्रात्- न. लिं. पं. वि. ए. व. of- पात्र- vessel, receptacle, holder,

स्रवति- वर्त. तृ. पु. ए. व. of स्रु- १ ग. प. प. to flow, trickle, ooze,चेद्- if, in case, provided that, ततः (ततस्)- from that, thence & इव- like, similar to all अव्ययs

गुणेषु यत्नः पुरुषेण कार्यः न किंचिदप्राप्यतमं गुणानाम्
गुणप्रकर्षादुडुपेन शंभोः अलंघ्यमुल्लंघितमुत्तमाङ्गम् ॥२३४॥ – मृच्छकटिक

पुरुषेण गुणेषु यत्नः कार्यः (कुर्यात्)। गुणानाम् न किंचित् अप्राप्यतमम् (अस्ति)। उडुपेन गुणप्रकर्षात् शंभोः अलंघ्यम् उत्तमाङ्गम् उल्लंघितम् (अस्ति) ॥

A person should work with full effort and with noble qualities (intentions). Nothing is impossible for a person with good qualities. With his excellent luminescence, the Moon climbed on to head of Lord Shiva, an impossible achievement.

(Actually, the moon had to ask for protection from Shiva from Daksha's curse, as he was favoring only Rohini and not Daksha's other daughters.)

पुरुषेण & उडुपेन- पु. लिं. तृ. वि. ए. व. of पुरुष- a man, person & उडुप- Moon- (उडुः - स्त्री. लिं. & उडु- न. लिं.- a lunar mansion, a star), उडुं पाति इति- उपपद तत्पुरुष; गुणेषु- स. वि. ए. व. & गुणानाम्- ष. वि. ब. व. of गुणिन् - पु/न. लिं.- person endowed eith quality, virtue, result, यत्नः- effort, attempt- diligence, कार्यः- to be done- (also करणीय, कर्तव्य & कृत्य)- कर्मणि विध्यर्थ धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, न किंचित्- nothing- (किंचित्- something, little), अप्राप्यतमम्- that cannot be achieved at all- (प्राप्य- to be obtained, to be achieved- also -प्रापनीय & प्रापितव्य- कर्मणि विध्यर्थ धा. सा. वि. of प्र+ आप्- आप्नोति-५ ग. प. प.)- न प्राप्य- अप्राप्य- नञ् तत्पुरुष स.- तम् suffix implies superlative degree & उल्लंघितम्- ascended, mounted upon- उल्लंघित- क. भू. धा. वि. of उद्+ लंघ्- (लंघ्- लंघति-ते १ ग. उ. प. to les, cross)- all in न. लिं. प्र. वि. ए. व., गुणप्रकर्षात्- पं. वि. ए. व. of गुणप्रकर्ष- excellence of quality- गुण- quality, virtue, - excellence, eminence- गुणस्य प्रकर्षम्- गुणप्रकर्षम्- ष. तत्पुरुष स. शंभोः- पु. लिं. ष. वि. ए. व. of शंभु- Shiva, अलंघ्यम्- insurmountable, impossible to ascend- - (लंघनीय, लंघितव्य)- to be ascended- कर्मणि विध्यर्थ धा. सा. वि. of लंघ्- see above & उत्तमाङ्गम्- head, the best part of the body- उत्तम- adjctv- best, excellent, अङ्गम्- part, portion- उत्तमम् अङ्गम् यद् तद्- बहुव्रीहि स.

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं यदि किममरैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२३५॥ - भर्तृहरी नीतिशतकम् ९४

(वयं) देवान् नमस्यामः, ननु ते अपि हतविधेः वशगाः (सन्ति)। विधिः वन्द्यः (किन्तु) सः आपि प्रतिनियतकर्मैकफलदः (अस्ति)। यदि फलम् कर्मायत्तम्, किम् अमरैः ? किम् च विधिना ? नमः तत् कर्मभ्यः, येभ्यः विधिः अपि न प्रभवति॥

We may salute the Gods, but even they are controlled by the cruel destiny. Then, we should salute the destiny. But, here again he (destiny) grants success (to those) who work diligently and regularly. If success depends on work, then why (pray to) God? Moreover, why (depend on) destiny? (Therefore), we salute (only) those who work. Even destiny does not control them.

नमस्यामः- द्वि. (सामान्य) भविष्य प्र. पु. ब. व. of नम्- नमति-ते १ ग. उ. प. to salute, bow, देवान्- पु. लिं. द्वि. वि. ब. व. of देव-God, हतविधेः-पु. लिं. ष. वि. ए. व. of हतविधिः- cruel destiny- हत- cruel, wretched, miserable- क. भू. धा. वि of हन्- हन्ति २ ग. प. प. to hurt, strike, kill, विधिः- destiny, fate, ते & वशगाः- पु. लिं. प्र. वि. ब. व. of तद्-he & वशग- under influence of- वश- under influence, control- वशे गच्छति इति- वशग- उपपद तत्पुरुष स, वन्द्यः, सः & प्रतिनियतकर्मैकफलदः- all पु. लिं. प्र. वि. ए. व. of वन्द्य- (also वन्दनीय, वन्दितव्य)- to be saluted, respected- कर्मणि वि. धा. सा. वि. of वन्द्- वन्दते १ ग. आ. प. to salute, तद्- he & प्रतिनियतकर्मैकफलद- steady work alone giving success प्रति- अव्यय- towards, by, नियत- steady, positive, definite- क. भू. धा. वि of नि+ यम्- to regulate, control- (यम्- यच्छति-१ ग. प. प. to curb, control), नियतम् नियतम्- प्रतिनियतम्- अव्ययीभाव स., कर्मन्- work, doing, एक- one- कर्म+ एकम्- कर्मैकम्- work alone प्रतिनियतम् कर्मैकम्- प्रतिनियतकर्मैकम्- विशेषणपूर्वपद कर्मधारय स., फल- fruit, result- फलम् ददाति इति- फलदः -उपपद तत्पुरुष स., प्रतिनियतकर्मैकः फलदः- प्रतिनियतकर्मैकफलदः- विशेषणपूर्वपद कर्मधारय स., अमरैः- पु. लिं. तृ. वि. ब. व. of अमर- God- न मर -अमर- नञ् तत्पुरुष स.- deathless, फलम्- fruit, result कर्मायत्तम्- dependent upon work, कर्मन्- work, आयत्तम्- dependent upon, resting with- आयत्त- क. भू. धा. वि of आ+ यत्- (यत्- यतते१ ग. आ. प. to attempt, try)- कर्मणा आयत्तम्- कर्मायत्तम्- तृ. तत्पुरुष स. & तद्- that, it- all in- न. लिं. प्र. वि. ए. व., कर्मभ्यः- न. लिं. च. वि. ब. व. of कर्मन्- work, doing, येभ्यः- from which/whom- पु/न. लिं. पं. वि. ब. व. of यद्- who, which, विधिः- प्र. वि. ए. व. & विधिना- तृ. वि. ए. व. of विधि- पु. लिं.- destiny, fate, providence, प्रभवति- प्र+भू- to arise, originate, prevail upon (भू- भवति १ ग. प. प. to be, to exist), यदि- if, in case, अपि- even, also, किम्- a particle of interrogation- why?, is it not?, नमः (नमस्)- salution, a bow, न-no, not, च- and, ननु= किन्तु- but, whereas-all अव्ययs

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे
वाणिज्यं कृषिसेवनं च सकला विद्याः कलाः शिक्षतु ।

आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥२३६॥ - भर्तृहरि नीतिशतक १०१

(मनुष्यः) अम्भसि मज्जतु, मेरुशिखरम् यातु, आहवे शत्रून् जयतु, वाणिज्यम् कृषिसेवनम् च सकलाः विद्या: कला: शिक्षतु, प्रयत्नम् कृत्वा खगवत् विपुलम् आकाशम् प्रयातु, परम् इह अभाव्यम् न भवति, कर्मवशतः भाव्यस्य नाश: कुत: (अस्ति) ॥

A man may dive deep into water or he may reach the summit of the mount- Meru. He may win over his enemies in the battle. He may indulge in commerce or agriculture or he may acquire all knowledge or learn cultured arts. By great efforts, he may even fly like a bird, around vast skies, but in this world, nothing happens that is not destined! How can one avoid destiny, based on one's Karma?

अम्भसि- न. लिं. स. वि. ए. व. of अम्भस्- water, मज्जतु, यातु, प्रयातु, शिक्षतु, जयतु- all आज्ञार्थ तृ. पु. ए. व. of मस्ज्- मज्जति- ६ ग. प. प. to plunge, dip sink, या- याति & प्र+ या- प्रयाति- २ ग. प. प. to go, move, set out, शिक्ष् -शिक्षते १ ग. आ. प. to learn, study, (used as प. प.) जि- जयति- १ प. प. to conquer, defeat, सकलाः- all, entire, विद्या:- knowledge, learning & कला:- arts- all in स्त्री. लिं. द्वि. वि. ब. व., वाणिज्यम्, कृषिसेवनम्, प्रयत्नम्, विपुलम्, आकाशम् & मेरुशिखरम्- all in- न. लिं. द्वि. वि. ए. व. of, वाणिज्य-trade, commerce, कृषिसेवन- doing agriculture- कृषि- स्त्री. लिं- agriculture, ploughing- सेवनम्- act of serving, doing- कृषेः सेवनम्- ष. तत्पुरुष स., प्रयत्न- effort, exertion, विपुल- adjctv- vast, large, expansive, आकाश- sky & मेरुशिखर- top of mount Meru- मेरु- name of the mountain, शिखर- top, summit- मेरोः शिखरम्- मेरुशिखरम्- ष. तत्पुरुष स., कृत्वा- after doing, having done- पू. का. वा. धा. सा. अव्यय of कृ- करोति-कुरुते ८ ग. उ. प. to do, खगवत्- like a bird- खग- bird- खम्- sky, खे गच्छति इति- खगः- उपपद तत्पुरुष स. & वत्- suffix implies quality, अभाव्यम्- न. लिं. प्र. वि. ए. व. of अभाव्य- that is not destined- न भाव्य- अभाव्य- नञ् तत्पुरुष स.- भाव्य- adjctv- about to happen, destined to happen in future- (also भावितव्य & भावनीय- भविष्य. कर्मणि वि. धा. सा. वि. of भू-भवति) , आहवे- स. वि. ए. व. of आहव- battle, war, शत्रून्- पु. लिं. द्वि. वि. ब. व. of शत्रु- enemy, भवति- वर्त. तृ. पु. ए. व. of भू-१ ग. प. प. to be, to exist, भाव्यस्य- ष. वि. ए. व. of भाव्य, नाशः- destruction, end- पु. लिं. प्र. वि. ए. व., कुत: (कुतस्)- where, which way, इह- here, in this world, च- and, न-no, not, परम्- but- all अव्ययs; कर्मवशतः - य: कर्मेण वशत: अस्ति स:- बहुव्रीहि स- Influenced by Karma or past deeds.

आमोदार्थी यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत्।
विज्ञानार्थी तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्॥२३७॥ -तन्त्रालोक:

यथा आमोदार्थी भृङ्गः पुष्पात् पुष्पान्तरम् व्रजेत्, तथा विज्ञानार्थी शिष्यः गुरोः गुर्वन्तरम् व्रजेत्॥

A student in pursuit of knowledge should go from one teacher to another (for mastering his subject of study), just like a black bee goes from one flower to another in search of pleasure of fragrance (and honey).

भृङ्गः- large black bee, शिष्यः- disciple, pupil, scholar, आमोदार्थी- one who is seeking pleasure, fragrance- आमोद- पु. लिं.- joy, pleasure, fragrance, अर्थिन्- पु. लिं.- one who is seeking, soliciting- आमोदस्य अर्थिन्- आमोदार्थिन् -ष. तत्पुरुष स. विज्ञानार्थी- one who is seeking knowledge, understanding- विज्ञान- knowledge, understanding- विज्ञानस्य अर्थिन्- विज्ञानार्थिन्- ष. तत्पुरुष स.- आमोदार्थी, विज्ञानार्थी -पु. लि. प्र. वि. ए. व., पुष्पात् & गुरोः- पं. वि. ए. व. of पुष्पम्- न. लिं- flower & गुरुः- पु. लिं- teacher, elder, पुष्पान्तरम् & गुर्वन्तरम्- द्वि. वि. ए. व. of पुष्पान्तर- the other flower & गुर्वन्तर- the other teacher/ elder- अन्तर- adjctv- other, another- अन्तरम् पुष्पम्- पुष्पान्तरम् & अन्तरः गुरुः- गुर्वन्तरः- both विशेषणोत्तरपद कर्मधारय स., व्रजेत्- विध्यर्थ तृ. पु. ए. व. of व्रज्- व्रजति १ ग. प. प. to go, proceed, यथा-how, in which way or manner & तथा- like that, in that way or manner- both अव्ययs

सर्वमेव परित्यज्य शरीरमनुपालयेत्।
शरीरस्य प्रणष्टस्य सर्वमेव विनश्यति ॥२३८ अ॥
(तदभावे हि भावानां सर्वाभावाः शरीरिणाम्) ॥२३८ ब॥

(मनुष्य:) सर्वम् परित्यज्य, शरीरम् एव अनुपालयेत्। शरीरस्य प्रणष्टस्य सर्वम् एव विनश्यति।
(शरीरिणाम् तदभावे भावानाम् सर्वाभावाः हि (भवन्ति)) ॥

A person should protect his health by foregoing everything else. If the body is destroyed, everything else is lost. (For the living beings, absence of that (body) is absence of everything else.)

सर्वम्- न. लिं. प्र. वि. & द्वि. वि. ए. व. of सर्व- all, entire, परित्यज्य- after leaving/ foregoing completely- पू. का. वा. ल्यबन्त धा. सा. अव्यय of परि+ त्यज्- (त्यज्- त्यजति- १ ग. प. प. to leave, abandon, शरीरम् & शरीरस्य- न. लिं. द्वि. वि. & ष. वि. ए. व. of शरीर- body, अनुपालयेत्- तृ. पु. ए. व. of अनु+ पाल् - अनुपालयति- ते- (पाल् - पालयति- ते, १० उभयपद. to protect, guard, keep) प्रणष्टस्य- ष. वि. ए. व. of प्रणष्ट- destroyed completely- क. भू. धा. वि. of प्र+ नश्- (नश्- नश्यति- ४ ग. प. प. to be lost, vanish), विनश्यति- gets destroyed- वर्त. तृ. पु. ए. व. of वि+ नश्- to be lost, तदभावे- पु. लिं. स. वि. ए. वि. of तदभाव- absence of that, non-existence that- तस्य आभावः - तदभावः- तत्पुरुष स.- भावः- existence, existing, becoming, शरीरिणाम् & भावानाम्- पु. लिं. ष. वि. ब. व. of शरीरिन्- one with body, being & भावः- (see above), सर्वाभावाः- - पु. लिं. प्र. वि. ब. व. of सर्वाभावः- absence of all, non-

existence of all- न भावः- अभावः- non-existence, absence- नञ् तत्पुरुष स.- सर्वस्य अभावः - सर्वाभावः- ष. तत्पुरुष स., एव- just, only, alone, हि-indeed, surely-both अव्ययs

वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि।
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद् यशः ॥२३९॥ -महाभा विदुरनीति ३६.२९

अल्पधनानि कुलानि, वृत्ततः तु अविहीनानि, कुलसंख्याम् च गच्छन्ति। महद् यशः अपि च कर्षन्ति॥

The families that safeguard their character, even if they may have little wealth, achieve great reputation and become very successful in life.

कुलानि, अविहीनानि & अल्पधनानि- न. लिं. प्र. वि. ब. व. of कुलम्- race, family, अविहीनम्- having, possessing, not devoid of- न विहीन- अविहीन- नञ् तत्पुरुष स.- विहीन- devoid of, not having- कर्तरि भू. धा. वि. of वि+ हा- (हा- जहाति २ ग. प. प. to leave, abandon) & अल्पधनम्- poor, with little wealth- अल्प- adjctv- little, small & धनम्- wealth, money- अल्पम् धनम्- अल्पधनम्- विशेषणपूर्वपद कर्मधारय स., वृत्ततः- by character, behaviour- (वृत्त- character, behaviour, conduct- क. भू. धा. वि. वृत्- वर्तते- १ ग. आ. प. to conduct, behave) & तः (तस्)- suffix implies quality, कुलसंख्याम्- स्त्री. लिं. द्वि. वि. ए. व. of कुलसंख्या- family reputation- संख्या- स्त्री. लिं.- reputation, recognition, numeral- कुलस्य संख्या- कुलसंख्या- ष. तत्पुरुष स., गच्छन्ति & कर्षन्ति- both १ ग. प. प. वर्त. तृ. पु. ब. व. of गम्- गच्छति to go, reach & कृष्- कर्षति- to draw, to lead, draw towards, महत्- adjctv- great, huge, यशः (यशस्)- न. लिं.- success, fame, reputation, च-and, तु- but, on the other hand, अपि- even, also- all अव्ययs

स्फुरसि शिरसि राज्ञामद्भुतं सौरभं ते
तव च जयति मूर्तिस्तप्तकार्तस्वराभा ।
न भजति मधुपश्चेच्चम्पक त्वामभाग्य-
स्तव भवतु निकामं तावता नैव तापः ॥२४०॥ -सुभाषितकौस्तुभ २०

चम्पक, (त्वम्) राज्ञाम् शिरसि स्फुरसि। तव सौरभम् अद्भुतम् (अस्ति)। ते मूर्तिः तप्तकार्तस्वराभा च जयति। अभाग्यः मधुपः त्वाम् न भजति चेत्, तव तावता निकामम् तापः न एव भवतु॥

Oh, Champak flower, you adorn on the heads of Kings. Your fragrance is extraordinary. Your appearance is like blazing gold. If unfortunate honeybee does not visit you, let that not give you much distress. (मधुप- also means drunkard implying: wise or learned man should not be bothered if a drunkard ignores him.)

चम्पक- name of flower- पु. लिं. सं. वि. ए. व., राज्ञाम्- पु. लिं. ष. वि. ब. व. of राजन्- king, शिरसि- न. लिं. स. वि. ए. व. of शिरस्- head, स्फुरसि- वर्त. द्वि. पु. ए. व. of स्फुर्- स्फुरति- १ ग. प. प. to throb, vibrate, तव & ते- ष. वि. ए. व. & त्वाम्- द्वि. वि. ए. व. of युष्मद्- you, सौरभम्- fragrance, अद्‌भुतम्- wonderful, supernatural, astonishing- न. लिं. प्र. वि. ए. व., मूर्तिः- shape, appearance, figure & तप्तकार्तस्वराभा- bright golden - तप्त- red-hot, blazing- (क. भू. धा. वि. of तप्- तपति- १ ग. प. प. to shine, blaze), कार्तस्वर- न. लिं.- gold, आभा- स्त्री. लिं.- lustre, splendour- तप्तम् कार्तस्वरम्- तप्तकार्तस्वरम्- विशेषणपूर्वपद कर्मधारय स. & कार्तस्वरम् इव आभा या सा- तप्तकार्तस्वराभा- बहुव्रीहि स.- both in स्त्री. लिं. प्र. वि. ए. व., अभाग्यः- unlucky, unfortunate, मधुपः- honeybee- मधु- न. लिं.- Honey, spirituous liquor- मधु पिबति इति- मधुपः- उपपद तत्पुरुष स., तापः- agony, distress- all in पु. लिं. प्र. वि. ए. व., भजति & जयति- both- १ ग. प. प. वर्त. तृ. पु. ए. व. of भज्- to serve, attend & जि- to win, prevail upon, overcome, भवतु- आज्ञार्थ तृ. पु. ए. व. of भू-भवति- १ ग. प. प. to be, to exist, निकामम्- very much, as desired, to one's satisfaction, तावता- on that account, due to that, चेत्-if, in case, न-no, not, एव- just, only, mete, च-and-all अव्ययs

आलोकेषु त्रिदशसुदृशामप्यनुद्यद्विकाराः
प्राणापत्स्वप्यनृतचकिताः प्राभवेष्वप्यदृप्ताः।
प्रत्यर्थिष्वप्यकठिनहृदः पार्थिवेष्वप्यदीनाः
सन्तो गुप्त्यै कतिचन युगेऽप्यन्तिमे सन्ति मेऽस्मिन् ॥२४१॥ -सुभाषितकौस्तुभ २१

कतिचन सन्तः ,त्रिदशसुदृशाम् आलोकेषु अपि अनुद्यद्विकाराः, प्राणापत्सु अपि अनृतचकिताः, प्राभवेषु अपि आदृप्ताः, प्रत्यर्थिषु अपि आकठिनहृदः, (तथा) पार्थिवेषु अदीनाः, मे (मम) गुप्त्यै अस्मिन् अन्तिमे युगे अपि सन्ति ॥

A few noble (saintly) persons, who are not getting their mind disturbed even at the sight of celestial beauties, who resist speaking a lie even at the time of life-threatening calamity, who do not get arrogant even during the period of prosperity, who are kind-hearted even to enemies and who are not pitiable (surrender their self-respect) even before the kings, are there for my protection even in this last of the four Yugas (Yuga of Kali).

अनुद्यद्विकाराः, अनृतचकिताः, अदृप्ताः, अकठिनहृदः, आदीनाः, कतिचन & सन्तः- all in पु. लिं. प्र. वि. ब. व. of अनुद्यद्विकार- not getting their mind disturbed- उद्यत्- getting raised- वर्त. का. धा. सा. वि. of उद्+ यम्- to raise, elevate- (यम्- यच्छति- to curb, restrain), अन् उद्यत्- अनुद्यत्- नञ् तत्पुरुष स., विकार- disturbance, change of form or mind, अनुद्यत् विकारः यस्य सः- अनुद्यद्विकार- बहुव्रीहि स., अनृतचकित- resist speaking a lie- ऋत- truth, अन् ऋत- अनृत- नञ् तत्पुरुष स., चकित- resisted- क. भू. धा. वि. of चक्- चकति-ते १ ग. उ. प. to resist,

repel, fear- अनृतम् चकितम् येन सः- अनृतचकितः -बहुव्रीहि स., अदृप्त- not get arrogant- न दृप्त- अदृप्त- नञ् तत्पुरुष स., दृप्त- क. भू. धा. वि. of दृप्- दृप्यति ४ ग. प. प. to be proud, arrogant, अकठिनहृद्- kind-hearted, कठिन- hard, tough, न कठिन- अकठिन- नञ् तत्पुरुष स., हृद्- न. लिं.- heart, mind, अकठिनम् हृद् यस्य सः- अकठिनहृद्- बहुव्रीहि स., अदीन- not indigent- दीन- poor, miserable- न दीन- अदीन- नञ् तत्पुरुष स., कतिचन- (कति+चन)- some, several a few-(कति- pronominal adjctv- always in plural- how many) & सत्- noble, saintly, ,आलोकेषु, प्राणापत्सु, प्राभवेषु, प्रत्यर्थिषु & पार्थिवेषु- all in स. वि. ब. व. of आलोक- seeing, beholding, प्राणापत्- life threatening moment- प्राणः- life, आपद्- स्त्री. लिं- danger, calamity- प्राणानाम् आपत्- प्राणापत्- ष. तत्पुरुष स., प्राभवम्- न. लिं.- supremacy, affluence, prosperity, प्रत्यर्थिन्- opponent, enemy & पार्थिव-king, त्रिदशसुदृशाम्- स्त्री. लिं. ष. वि. ब. व. of त्रिदशसुदृश्- divine beauty- त्रिदशः-god, an immortal, सुदृश्- beauty, pretty woman- सुन्दरा दृश्यते इति- सुदृश्- उपपद तत्पुरुष स., त्रिदशा इव सुदृश्- त्रिदशसुदृश्- विशेषणपूर्वपद कर्मधारय स., गुप्त्यै- स्त्री. लिं. च. वि. ए. व. of गुप्ति- protection, अस्मिन्, युगे & अन्तिमे- न. लिं. स. वि. ए. व. of इदम्- this, युग- age, period & अन्तिम- adjctv- last, final, सन्ति- वर्त. तृ. पु. ब. व. of अस्-अस्ति २ ग. प. प. to be, to exist, मे (मम)- च. वि. ए. व. of अस्मद्- I, we, अपि-even, also- अव्यय

सदैव मित्राभ्युदयाभिकाङ्क्षिभिः महातपस्स्मेरतमैः कुशेशयैः ।
प्रगल्भसौरभ्यविशेषनिर्भरैः परिष्कृतिः किं भुवनस्य नो भवेत् ॥२४२॥ -सुभाषितकौस्तुभ २२

(१) सदा एव मित्राभ्युदयाभिकाङ्क्षिभिः, महातपस्- स्मेरतमैः, कुशेशयैः, प्रगल्भसौरभ्यविशेषनिर्भरैः भुवनस्य परिष्कृतिः किं नो भवेत्?

(२)कुशेशयैः सदा एव मित्राभ्युदयाभिकाङ्क्षिभिः, महातपस्स्मेरतमैः, प्रगल्भसौरभ्यविशेषनिर्भरैः भुवनस्य परिष्कृतिः किं नो भवेत्?

Here the author has beautifully used double meaning for the words in (१) & (२) as below:
(१) Why would not this world get purified, when there are people who are always desire prosperity for their friends, who sport a beautiful smile even during great sufferings, who sleep on the bed of Kusha (grass) and who are full of outstanding reputation (character) ?

(२) Why would not this world appear well decorated, when lotuses are eagerly waiting for the Sunrise, which bloom under intense heat of that sunshine and which are full of extraordinary fragrance?

मित्राभ्युदयाभिकाङ्क्षिभिः, महातपस्स्मेरतमैः, कुशेशयैः, प्रगल्भसौरभ्यविशेषनिर्भरैः- पु. लिं. तृ. वि. ब. व. of मित्राभ्युदयाभिकाङ्क्षिन्- eagerly desirous of rise of the Sun /friend, (१) मित्रम्-friend (२) मित्रः- the Sun, अभ्युदय- (१) prosperity, elevation (२) sunrise- (अभि+उद् +अय्- अयते- १ ग. आ. प.), अभिकाङ्क्षिन्- adjctv- one who is wanting, longing, eagerly awaiting- (अभि+ काङ्क्ष्- काङ्क्षति- १ ग. प. प.)- मित्रस्य अभ्युदयम्- मित्राभ्युदयम् & मित्राभ्युदयस्य अभिकाङ्क्षिन्- मित्राभ्युदयाभिकाङ्क्षिन्- both ष. तत्पुरुष स., महातपस्स्मेरतम- (१) who sports a smile during extensive suffering, (२) which blooms under the heat of the Sun, महा (महत्)- adjctv- great, big, long extensive, तपस्- न. लिं- (१) penance, suffering, (२) heat, स्मेर- (१) smiling, (२) blooming- (स्मि- स्मयते १ आ. प. to smile, bloom, expand) तम- suffix implies superlative degree- महत् तपस्- महातपस्- विशेषणपूर्वपद कर्मधारय स., महातपसि स्मेरतमः यः सः- बहुव्रीहि स., कुशेशय- (१) who sleeps on bed of grass (दर्भः)- कुशः (दर्भः)- sacrad grass, शय- adjctv- sleeping, lying down (शी-शेते २ ग. आ. प. to sleep)- कुशे शेते यः सः कुशेशयः (२) कुशेशयम्- न. लिं.- lotus, water lily, प्रगल्भसौरभ्यविशेषनिर्भर- (१) full of outstanding reputation (character) in abundance,(२) full of extraordinary fragrance- प्रगल्भ- ajctv- (१) confident, bold (२) fully developed, सौरभ्य- (१) character, reputation (२) fragrance, विशेष-adjctv- peculiar, abundant, निर्भर- (१) full of, (२) filled with- प्रगल्भम् सौरभ्यम्- प्रगल्भसौरभ्यम् & विशेषम् निर्भरम्- विशेषनिर्भरम्- both विशेषणपूर्वपद कर्मधारय स. & प्रगल्भसौरभ्येण विशेषनिर्भरम्- प्रगल्भसौरभ्यविशेषनिर्भरम्- तृ. तत्पुरुष स, भुवनस्य- न. लिं. ष. वि. ए. व. of भुवनम्- world, परिष्कृतिः-स्त्री. लिं. (१) purification (२) adornment, decoration- (परिष्कृत- क. भू. धा. वि. of परिस्+कृ- to adorn, refine, purify), भवेत्- विध्यर्थ तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, to exist, किम्- interrogative particle- why- सदा- always, ever, at all times, एव- just, alone, merely, नो- (न+उ)- no, not- all अव्ययs

अत्यासक्तिस्साधुषु ब्रह्मनिष्ठेष्वौदासीन्यं प्राणिषु प्राकृतेषु
दृप्तेष्वार्यद्रोहिषु द्वेष एवेत्येषा रीतिर्भाति शुद्धा बुधानाम् ॥२४३॥ -सुभाषितकौस्तुभ ३२

बुधानाम् ब्रह्मनिष्ठेषु साधुषु अत्यासक्तिः, प्राणिषु प्राकृतेषु औदासीन्यम्, आर्यद्रोहिषु दृप्तेषु द्वेषः इति एषा शुद्धा रीतिः एव भाति॥

Following clean way of living of the learned people stands out splendidly!

- Devotion to noble (saintly) people contemplating the Supreme, indifference towards other living beings and materialistic world, hatred for arrogant people and for those who harm to civilized society.

बुधानाम्- पु. लि. ष. वि. ब. व. of बुध- noble, wise, learned-person, ब्रह्मनिष्ठेषु, साधुषु, प्राणिषु, आर्यद्रोहिषु & दृप्तेषु- all in पु. लि. स. वि. ब. व. of ब्रह्मनिष्ठ- person contemplation of the

Supreme, साधु- noble or saintly person, प्राणिन्- animal, living being, man, आर्यद्रोहिन्- person causing harm to civilized people- आर्य- civilized, noble, द्रोहिन्- person causing hurt, injury- आर्याणाम् द्रोहिन्- आर्यद्रोहिन्-ष. तत्पुरुष स. & दृप्त- arrogant, proud- क. भू. धा. वि. of दृप्- दृप्यति ४ ग. प. प. to be arrogant, haughty, प्राकृतेषु- स्त्री. लि. स. वि. ब. व. of प्राकृति- natural or materialistic object, अत्यासक्तिः- great interest, attachment, devotional, fondness- स्त्री. लि. प्र. वि. ए. व.- अति- अव्यय- very, exceedingly, much, आसक्ति- interest (आसक्त- क. भू. धा. वि. of अति+ आ+ संज्- सजति-१ ग. प. प. to adhere), औदासीन्यम्- indifference, apathy- न. लि. प्र. वि. ए. व. (उदास- indifferent, passive), द्वेषः- dislike, hate- पु. लि. प्र. वि. ए. व., एषा (एतद्)- this, शुद्धा- pure, clean- (शुद्ध- क. भू. धा. वि. of शुध्- शुध्यति ४ प. प. to become pure, to cleanse) & रीतिः- manner, behavior- all in स्त्री. लि. प्र. वि. ए. व., भाति- वर्त. तृ. पु. ए. व. of भा-२ ग. प. प. to shine, to be splendid, outstanding, एव- just, alone, only & इति- namely- allअव्ययs

अतुल्या कल्याणी प्रकृतिरनघं वल्गु च वचो मनीषा निर्दोषा महितमविगीतं च चरितम् ।
अदूष्यं वैदुष्यं हृदयमपि येषामुरुदयं ध्रुवं तेषामेषामिह परिचिचीषापि शुभदा ॥२४४॥ - सुभाषितकौस्तुभ ३४

येषाम् प्रकृतिः अतुल्या कल्याणी, वचः अनघम् वल्गु च, मनीषा निर्दोषा, चरितम् महितम् अविगीतम् च, वैदुष्यम् अदूष्यम्, एषाम् हृदयम् अपि उरुदयम् ध्रुवम्, तेषाम् इह परिचिचीषा अपि शुभदा (भवति) ॥

Whose nature is incomparably auspicious, whose speech is unblemished and sweet, whose wisdom is faultless, whose character is consistent and uncensored, whose intellect is faultless and even their heart is always full of compassion, a desire to get to know such persons is sure way for happiness.

प्रकृतिः- nature, अतुल्या- incomparable, कल्याणी- auspicious, excellent, मनीषा- desire, intelligence, निर्दोषा- faultless, unblemished- दोषः- fault, blame- (निर्गतः दोषः- निर्दोषः- कर्मधारय स.), परिचिचीषा- desire to get to know- (परि+ चि- चिनोति-चिनुते- to get, acquire- प्रयोजक desiderative- परिचिचीषति), शुभदा- auspicious- शुभम् ददाति इति- शुभदा- उपपद तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., वचः (वचस्)- speech, talk, अनघम्- sinless, faultless- घम्- sin, अन् घम्- नञ् तत्पुरुष स., चरितम्- behaviour, conduct, महितम्- esteemed, revered- (महित- क. भू. धा. वि. of मह्- महति १ ग. प. प. to honour, respect), अविगीतम्- consistent, unabused- (विगीत- क. भू. धा. वि. of वि+गै- to censure, blame- गै- गायति- १ ग. प. to sing- न विगीत- अविगीत- नञ्- तत्पुरुष स.), वैदुष्यम्- scholarship, wisdom, अदूष्यम्- unblemished- न दूष्यम्- अदूष्यम्- नञ्- तत्पुरुष स., (दूष्य- कर्मणि वि. धा. सा. वि. of प्रयोजक of दुष्- दोषयति- ते- to taint, defile) हृदयम्- heart, mind, उरुदयम्- full of compassion,

(उरु-adjctv- great, large, दया- compassion, उरु दया- उरुदया- विशेषणपूर्वपद कर्मधारय स.), ध्रुवम्- firm, stable- all in न. लिं. प्र. वि. ए. व., वल्गु- adjctv- lovely, pleasant, येषाम्, तेषाम् & एषाम्- पु. लिं. ष. वि. ब. व. of यद्- who, तद्-he, it, इदम्- he, this, च- and, अपि- also, even, इह-here, in this world- all अव्ययs

दैर्घ्यं बाह्वोरेव येषां न वैरे
तैक्ष्ण्यं बुद्धावेव दृष्टं न वाचि।
मान्द्यं हासे मानसे नैव तेषां
के वा नेच्छन्त्यत्र सेवामभिज्ञाः ॥२४५॥ -सुभाषितकौस्तुभ ३६

येषाम् दैर्घ्यम् बाह्वोः एव न वैरे (भवति), (येषाम्) तैक्ष्ण्यम् बुद्धौ एव दृष्टम् न वाचि, (येषाम्) मान्द्यम् हासे (भवति) न एव मानसे (भवति) तेषाम् सेवाम् के वा अभिज्ञाः अत्र न इच्छन्ति ?

Which knowledgeable persons here would not want to serve those, whose arms are long (indicative of strength) but not their enmity, whose sharpness is seen in their intellect but not in their talk, whose mildness is in their smile but not in their mind? (Their minds are sharp.)

येषाम्- for whom & तेषाम्- for them- पु. लिं. ष. वि. ब. व. यद्- who & तद- he, दैर्घ्यम्-length, longness- (दीर्घ-adjctv- long), तैक्ष्ण्यम्- sharpness, strength (तीक्ष्ण- adjctv- sharp, hot, strong) & मान्द्यम्- mildness, weakness- (मन्द- adjctv- mild, weak, slow)- all in न. लिं. प्र. वि. ए. व., बाह्वोः- स. वि. द्वि. व. of बाहु- पु. लिं.- arm, वैरे, बुद्धौ, वाचि, हासे & मानसे- all in स. वि. ए. व. of वैर- न. लिं.- enmity, hostility, बुद्धि- स्त्री. लिं.- Intellect, understanding talent, वाच्- न. लिं.- speech, talk, हास- पु. लिं.- smile, laughter, मानस-adjctv- pertaining to mind, के & अभिज्ञाः- both in पु. लिं. प्र. वि. ब. व. of किम्-who, which & अभिज्ञ- knowledgeable person, clever, दृष्टम्- seen, observed- न. लिं. प्र. वि. ए. व. (दृष्ट- क. भू. धा. वि. of दृष्- पश्यति १ ग. प. प. to see, observe), इच्छन्ति- वर्त. तृ. पु. ब. व. of इष्- इच्छति ६ ग. प. प. to desire, want, wish, सेवाम्- स्त्री. लिं. द्वि. वि. ए. व. of सेवा- service, worship, एव- just alone, only, न- no, not, वा-or, and, अत्र- here-all अव्ययs

अज्ञस्त्वां यदुपेक्ष्य मन्दमतिभिर्धन्यं सदा मन्यते
शोको मास्तु ततस्सुधीजनसभाशोभाकृतस्ते कवे ।
खद्योतं निदधातु भास्करतया नीडे निजे टिट्टिभो
दीपः क्ष्मापतिकेलिसौधमहितः किं तावता हीयते ॥२४६॥ -सुभाषितकौस्तुभ १३

कवे, यद् अज्ञः, त्वाम् उपेक्ष्य, मन्दमतिभिः सदा धन्यम् मन्यते, ततः सुधीजनसभाशोभाकृतः ते, शोकः मा अस्तु। टिट्टिभः निजे नीडे खद्योतम् भास्करतया निदधातु, तावता किम् क्ष्मापतिकेलिसौधमहितः दीपः हीयते?

Oh Learned-one, if an ignorant person, disregarding you, always considers himself fortunate in the company of foolish people, should not cause grievancec to you, who has reputation of enhancing the decorum of assembly of good intellectual people,. Let that tiny Tittiba bird keep a firefly in its nest like a Sun (for providing illumination)! By that, would a lamp, that had the honour of illuminating recreational mansion of a Royal palace, be disgraced?

कवे- पु. लिं. सं. वि. ए. व. of कवि- poet, learned/ wise man, अज्ञः- ignorant, foolish, सुधीजनसभाशोभाकृतः- सु- अव्यय- suffix implies- good, excellent- धीः- स्त्री. लिं- intellect, mind, जन- पु/न. लिं- people, सभा- स्त्री. लिं- assembly, gathering, शोभा- स्त्री. लिं- grace, elegance, कृत- done, accomplished- क. भू. धा. वि. of कृ- करोति- कुरुते ८. ग. उ. प. to do- सुभगा धीः यस्य सः- सुधीः, सुधीः जनः- सुधीजनः- कर्मधारय स., सुधीजनस्य सभा- सुधीजनसभा & सुधीजनसभायाः शोभा- सुधीजनसभाशोभा- both ष. तत्पुरुष स., सुधीजनसभाशोभाम् कृतः यः सः- सुधीजनसभाशोभाकृतः - बहुव्रीहि स., टिट्टिभः- a kind of tiny bird, शोकः-sorrow, grievance, क्ष्मापतिकेलिसौधमहितः- that had the honour of illuminating recreational mansion of a Royal palace, क्ष्मा- स्त्री. लिं- earth, पतिः- master, lord, केलि- पु. लिं.- play, sport, pastime, सौध- mansion, महितः - पु. लिं.- honoured, revered- क. भू. धा. वि. of मह्- महति- १ ग. प. प. to honour- क्ष्मयाः पतिः- क्ष्मापतिः -King- केलेः सौधः- केलिसौधः- recreational mansion- क्ष्मापतेः केलिसौधः- क्ष्मापतिकेलिसौधः - all ष. तत्पुरुष स., & क्ष्मापतिकेलिसौधे महितः- क्ष्मापतिकेलिसौधमहितः- स. तत्पुरुष स., दीपः- lamp- all in- पु. लिं. प्र. वि. ए. व., त्वाम्- द्वि. वि. ए. व. & ते (तव)- ष. वि. ए. व. of युष्मद्- you, उपेक्ष्य- disregarding, neglecting- पू. का. वा. ल्यबन्त धा. सा. अव्यय of उप+ ईक्ष्- to neglect, disregard- (ईक्ष्- ईक्षते १ ग. आ. प. to see, look at), मन्दमतिभिः- पु/स्त्री. लिं. तृ. वि. ब. व. of मन्दमति- dull-headed, ignorant- मन्द- adjctv- dull, slow, मति- mind, thinking- मन्दः मतिः यस्य सः- मन्दमतिः- बहुव्रीहि स., धन्यम् & खद्योतम्- पु. लि. द्वि. वि. ए. व. of धन्य- fortunate, lucky, blessed & खद्योत-firefly, मन्यते- वर्त. तृ. पु. ए. व. of मन्- ४ ग. आ. प. to think, consider, अस्तु & निदधातु- आज्ञार्थ तृ. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist & नि+ धा- to keep- (धा- दधाति -धत्ते- ३ ग. उ. प. to place, put), निजे & नीडे- स. वि. ए. व. of निज- one's own, self & नीड-nest, भास्करतया- like a Sun- भास्कर- Sun, तया- suffix implies' as a substitute, like, हीयते- getting lost- कर्मणि प्रयोग तृ. पु. ए. व. of हा- जहाति २ ग. प. प. to leave, abandon, तावता- by that, by doing so, किम्- interrogative particle, मा- particle of prohibition- do not, let not, यद्- since, because, as, सदा- always, regularly, daily, ततः (ततस्)- from that, thereupon- all अव्ययs,

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ॥२४७॥- कालिदास, रघुवंश ८.८७

बुधैः शरीरिणाम् मरणम् प्रकृतिः, (तथा) जीवितम् विकृतिः (इति) उच्यते। जन्तुः यदि क्षणम् अपि श्वसन् अवतिष्ठते, असौ ननु लाभवान् (अस्ति) ॥

The wise say that death is natural for living beings, whereas life is accidental. If a living being exists by breathing even for a moment, he is indeed a gainer (fortunate)!

We have not yet discovered life anywhere else in this Universe. Therefore, Life on Earth in this Universe must be an exception; not the rule.

बुधैः- पु. लिं. तृ. वि. ब. व. of बुध- learned, wise, knowledgeable, शरीरिणाम्- पु. लिं. ष. वि. ब. व. of शरीरिन्- one who is living, embodied, incarnate, मरणम्, - death & जीवितम्- being living, life, existence- both in न. लिं. प्र. वि. ए. व., प्रकृतिः- nature, natural form, विकृतिः- deformation, accidental, unnatural- both in स्त्री. लिं. प्र. वि. ए. व., उच्यते- कर्मणि प्रयोग तृ. पु. ए. व. of वच्- वक्ति २ ग. प. प. to say, जन्तुः- living being, man, creature, लाभवान्- (लाभवत्)- gainer, fortunate- (लाभ-gain, वत्- suffix implies quality, possession), श्वसन्- (श्वसत्)- breathing- वर्त. का. वा. धा. सा. वि. of श्वस्- श्वसिति २ ग. प. प. to breathe & असौ- (अदस्)- he- all in पु. लिं. प्र. वि. ए. व., अवतिष्ठते- वर्त. आ. प. तृ. पु. ए. व. of अव+ स्था- to remain, exist, stay- (स्था- तिष्ठति-१ ग. प. प. to stand, stay), क्षणम्- a moment, an instant, अपि- also, even, यदि- if, in case, ननु- surely, certainly, indeed- all अव्ययs

हन्त स्वयमशक्तैरप्यशक्यार्थस्समीहितः ।
मुख्यसम्बन्धमाहात्म्यान्नीयते सिद्धिमञ्जसा ॥२४८॥ सुभाषितकौस्तुभ -२५

हन्त, स्वयम् अशक्तैः अशक्यार्थः, मुख्य-सम्बन्ध-माहात्म्यान् समीहितः अञ्जसा अपि सिद्धिम् नीयते॥

Here, the author uses double meaning words to convey two parallel meanings:

1. Oh, the incompetent people who cannot achieve their desired goal themselves can accomplish it quickly, in association with virtuous people.

2. Words those are not capable of conveying desired meaning by themselves, will be able to express correctly the desired meaning with the association of suitable entity.

अशक्तैः- पु. लिं. तृ. वि. ब. व. of अशक्तः- weak, incapable, incompetent- न शक्तः- अशक्तः- नञ् तत्पुरुष स.- (शक्त- competent, capable- क. भू. धा. वि. of शक्- शक्नोति- ५ ग. प. प. to be able), मुख्यसम्बन्धमाहात्म्यान्- पु. लिं. द्वि. वि. ब. व. of मुख्यसम्बन्धमाहात्म्य- one who has virtue of influencing others coming in contact, मुख्य- adjctv- chief, main, important, principal, सम्बन्ध- connection, union, relationship, माहात्म्यम्- magnanimity, noble quality, particular virtue- मुख्यम् सम्बन्धम्- मुख्यसम्बन्धम्- विशेषणपूर्वपद कर्मधारय स. & मुख्यसम्बन्धस्य माहात्म्यम्- मुख्यसम्बन्धमाहात्म्यम्- ष. तत्पुरुष स. & यस्य मुख्यसम्बन्धमाहात्म्यम् वर्तते सः- मुख्यसम्बन्धमाहात्म्यः- बहुव्रीहि स., समीहितः- one who has desired/ longed for -क. भू. धा. वि. of सं+ ईह्- (ईह्- ईहते १ ग. आ. प. to desire, wish) & शक्यार्थः- one who has accomplished the goal, purpose, meaning- शक्य- possible- (also शक्तव्य & शकनीय- कर्मणि वि. धा. सा. वि. of शक्-see above), अर्थः- purpose, goal, meaning- शक्यः अर्थः यस्य सः- शक्यार्थः- बहुव्रीहि स., both in- पु. लिं. प्र. वि. ए. व., सिद्धिम्- स्त्री. लिं. द्वि. वि. ए. व. of सिद्धि- accomplishment, success, fulfilment, नीयते- कर्मणि प्रयोग वर्त. तृ. पु. ए. व. नी- नयति- ते- १ ग. ग. उ. प. to carry, bring, convey, हन्त- a particle implying joy, surprise, pity, अपि-also, even, अञ्जसा- rightly, quickly, straight way & स्वयम्- by oneself, of its own- all अव्ययs

लोके नास्ति नृपोऽत्र दर्परहितो विद्वान्न निर्मत्सरः
शैलो नास्ति च हिंस्रजन्तुरहितः काव्यं न दोषोज्झितम्।
वाणिज्यं न च वञ्चनाविरहितं वृत्तिर्न निष्कण्टका
निर्दोषं नहि वस्तु किञ्चन ततो मोहं त्यजेत्सर्वथा ॥२४९॥

अत्र लोके दर्परहितः नृपः न अस्ति। विद्वान् निर्मत्सरः न (अस्ति)। हिंस्रजन्तुरहितः शैलः च न अस्ति। काव्यम् दोषोज्झितम् न (अस्ति)। वञ्चनाविरहितम् वाणिज्यम् च न अस्ति। निष्कण्टका वृत्तिः न (अस्ति)। किञ्चन वस्तु निर्दोषम् नहि (अस्ति)। ततः (मनुष्यः) सर्वथा मोहम् त्यजेत्।

In this world, there is no King without arrogance. There is no scholar free from jealousy and there is no mountain without wild animals. There is no poetical composition free from any mistakes and there is no business without cheating. There is no profession without any problems and there is no object free of defect. Therefore, one should disregard any desire for perfection in this world.

लोके- पु/न. लिं. स. वि. ए. व. of लोक- world, नृपः- king, दर्परहितः- free from arrogance- दर्प- arrogance, रहित- without, free of- क. भू. धा.वि. of रह्- रहति-१ ग. प. प. to be devoid of, without- दर्पेण रहितः- दर्परहितः- तृ. तत्पुरुष स., निर्मत्सरः- without jealousy- मत्सरः- jealousy; निर्गतः मत्सरः- निर्मत्सरः - प्रादि कर्मधारय स., विद्वान् (विद्वस्)- scholar, learned person, शैलः- mountain, हिंस्रजन्तुरहितः- without wild beasts- हिंस्र- adjctv- wild, cruel,

injurious, जन्तु- animal, living being, हिंस्रः जन्तुः- हिंस्रजन्तुः- विशेषणपूर्वपद कर्मधारय स.- हिंस्रजन्तुना रहितः- हिंस्रजन्तुरहितः- तृ. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., निष्कण्टका- without hazard, trouble- (कण्टकः/कम्- thorn, troublesome- निर्गतः कण्टकः - निष्कण्टकः- प्रादि कर्मधारय स.) & वृत्तिः - selection, profession, both in स्त्री. लिं. प्र. वि. ए. व., काव्यम्- poem, poetical composition दोषोज्झितम्- free from defect/ weak-point- दोष- fault, censure, blemish, उज्झित- abandoned, escape from- क. भू. धा. वि. of उज्झ्- उज्झति६ ग. प. प. to abandon, leave, quit- दोषात् उज्झितम् - दोषोज्झितम् - पञ्चमी तत्पुरुष स., वञ्चनाविरहितम्- free from वञ्चना-स्त्री. लिं.- fraud, deception, cheating, विरहितम्- without, free of- (विरहित- क. भू. धा.वि. of वि+ रह्-see above), वाणिज्यम्- trade, business, किञ्चन (किम्+चन)- something, little bit, न किञ्चन- nothing, निर्दोषम्- without blemish, faultless- दोषम्-fault, blame- (निस् or नर् prefix implies without- निर्गतम् दोषम्- निर्दोषम्- प्रादि कर्मधारय स.), वस्तु- article, object- all in न. लिं. प्र. वि. ए. व., मोहम्- पु. लिं. द्वि. वि. ए. व. of मोह- delusion, ignorance, folly, infatuation, अस्ति- वर्त. तृ. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, त्यजेत्- विध्यर्थ तृ. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, quit, abandon, अत्र- here, in this world, ततः (ततस्)- therefore, thereupon, thence, न-no, not, नहि- certainly not, च-and, सर्वथा- in every way, by all means- all अव्ययs

मा नः कुले वैरकृत्कश्चिदस्तु, राजाऽमात्यो मा परस्वापहारी।
मित्रद्रोही नैकृतिकोऽनृती वा, पूर्वाशी वा पितृदेवातिथिभ्यः ॥२५०॥ -महाभा विदुरनीति ३६-३७

नः कुले वैरकृत् कश्चित् मा अस्तु। राजा अमात्यः परस्वापहारी मा (अस्तु)। मित्रद्रोही, नैकृतिकः, अनृती, वा पितृदेवातिथिभ्यः पूर्वाशी वा (मा अस्तु) ॥

Let no one in our family harbor animosity. Let no King or a minister snatch others' wealth. Let no one betray a friend's trust or be dishonest or a liar. Let no one eat before offering food to parents, God and guest.

नः (अस्माकम्) -our- ष. वि. ए. व. of अस्मद्-I, we, कुले- न. लिं. स. वि. ए. व. of कुलम्- race, family, अस्तु- आज्ञार्थ तृ. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, वैरकृत्- one with वैर- animosity, hostility, वैरम् करोति इति- वैरकृत्- उपपद तत्पुरुष स, कश्चित्- (कः चित्)- someone, anyone, राजा (राजन्)- king, अमात्यः- minister, counsellor, परस्वापहारी- snatcher of another's property- परस्व- another's property, wealth- अपहारिन्- snatcher, thief- परस्वस्य अपहारी- परस्वापहारिन्- ष. तत्पुरुष स, मित्रद्रोही- betrayer of a friend- मित्र- न. लिं.- friend, द्रोहिन्- betrayer, मित्रस्य द्रोहम् करोति यः सः- मित्रद्रोहिन्- बहुव्रीहि स, नैकृतिकः- dishonest, wicked, अनृती- liar, deceptive person- (ऋत- truth अन् +ऋत- अनृत- false, अनृतम् वदति यः सः -अनृतिन् , बहुव्रीहि स.), पूर्वाशी- one who eats before- पूर्व- prior, former, before- पूर्वे अश्नाति यः सः- पूर्वाशिन्- बहुव्रीहि स.- all in पु. लिं. प्र. वि. ए. व.,

पितृदेवातिथिभ्यः- पु. लिं. पं. वि. ब. व. of पितृदेवातिथिः- parents, God, and guest- पिता च देवः च अतिथिः च- द्वंद्व स. वा- and, or, मा- particle of prohibition- both अव्ययs

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः॥२५१॥ (सखा अथवा स्वसा)

मम माता सत्यम् (अस्ति) । (मम) पिता ज्ञानम् (अस्ति) । (मम) भ्राता धर्मः (अस्ति) । (मम) सखा/ स्वसा दया (अस्ति) । (मम) पत्नी शान्तिः (अस्ति), । (तथा मम) पुत्रः क्षमा (अस्ति)। एते षड् (मम) बान्धवाः (सन्ति) ॥

Truthfulness is my mother, knowledge is my father, Dharma is my brother, compassion is my friend/ sister, peace is my wife and forgiveness is my son. These six are my relatives.

मम- mine- ष. वि. ए. व. of अस्मद्- I, we, सत्यम्- truth & ज्ञानम्- knowledge, understanding- both in न. लिं. प्र. वि. ए. व., माता-(मातृ)- mother, दया- compassion, mercy, sympathy, क्षमा- forgiveness, forbearance, शान्तिः- peace, pacification, calmness, पत्नी- wife & स्वसा- sister- all in स्त्री. लिं. प्र. वि. ए. व., पिता (पितृ)- father, धर्मः- prescribed codes of conduct, religion, भ्राता (भातृ)- brother, सखा (सखि)- friend & पुत्रः- son- all in- पु. लिं. प्र. वि. ए. व., एते, षड् & बान्धवाः-all in- पु. लिं. प्र. वि. ब. व. of एतद्- this, षष्- six & बान्धव- kinsman, relatives, brother

मन्दप्रज्ञाध्यापनं क्षुद्रमैत्री नीरूपस्त्रीसंगतिर्नीचसेवा।
सारासारज्ञानहीनानुसारः केषां न स्यात्खेदसम्पादनाय ॥२५२॥- सुभाषितकौस्तुभ १७

मन्द-प्रज्ञ-अध्यापनम्, क्षुद्र-मैत्री, नीरूप-स्त्री-संगतिः, नीच-सेवा, सार-असार-ज्ञान-हीन-अनुसारः, केषाम् न खेद-सम्पादनाय स्यात्॥

Whom the following will not make sad?
-Teaching a lazy or dull-headed person, friendship with a mean person, company of an ugly or shapeless woman (or man), serving a lowly person and following an indiscriminate person, who cannot differentiat between right and wrong.

मन्दप्रज्ञाध्यापनम्- teaching a lazy or dull-headed person- मन्द- adjctv- lazy, slow, dull, प्रज्ञा- intelligence, understanding, wisdom, अध्यापन- educating, teaching- (अधि+ प्रयोजक इ- अध्यापयति- to teach)- मन्दा प्रज्ञा यस्य सः- मन्दप्रज्ञः- बहुव्रीहि स. & मन्दप्रज्ञस्य अध्यापनम्- मन्दप्रज्ञाध्यापनम्- ष. तत्पुरुष स., क्षुद्रमैत्री- friendship with a mean person- क्षुद्र- adjctv- mean, small, मैत्री- friendship- क्षुद्रस्य मैत्री- क्षुद्रमैत्री-ष. तत्पुरुष स., नीरूपस्त्रीसंगतिः-

company of (union with) an ugly or shapless woman, नीरूपा स्त्री- नीरूपस्त्री- विशेषणपूर्वपद कर्मधारय स. &, नीरूपस्त्रियः संगतिः- नीरूपस्त्रीसंगतिः- ष. तत्पुरुष स., नीचसेवा- serving a mean person- नीच- mean, lowly, सेवा- service- नीचस्य सेवा- ष. तत्पुरुष स. -all in स्त्री. लिं. प्र. वि. ए. व., सारासारज्ञानहीनानुसारः- following one who is devoid of understanding of proper or right and improper or wrong thing- पु. लिं. प्र. वि. ए. व.- सार- essential proper, न सार- असार- non-essential- नञ् तत्पुरुष स., ज्ञान- knowledge, understanding, हीन- devoid of, lack of- क. भू. धा. वि. of हा- जहाति २ ग.प. प. to leave, abandon, अनुसार- following, pursuit- सारः असारः च- सारासारः- द्वंद्व स.- सारासारस्य ज्ञानम्- सारासारज्ञानम्- ष. तत्पुरुष स., सारासारज्ञानस्य हीनम्- सारासारज्ञानहीनम्- ष. तत्पुरुष स. & सारासारज्ञानहीनस्य अनुसारः- सारासारज्ञानहीनानुसारः- ष. तत्पुरुष स., केषाम्- पु. लि. ष. वि. ब. व. of किम्- who, खेदसम्पादनाय- च. वि. ए. व. of खेदसम्पादन- for generating sorrow- खेद- sorrow, grief, सम्पादन- acquisition, produce- (सं+पद्- to arise, produce, bring about- पद्यते-४ ग. आ. प.)- खेदस्य सम्पादनम्- खेदसम्पादनम्- ष.   तत्पुरुष स., स्यात्- विध्यर्थ तृ. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, न-no, not

गीतं कोकिल तावकं रसविदः शृण्वन्ति कर्णामृतं
नो किञ्चिद्वितरन्ति ते तरुदलैरेव स्वयं जीवसि।
कर्णायुर्हरमुद्गिरन्ति विरुतं काकास्तु तेभ्यो बलिं
प्राज्ञा एव हरन्ति हन्त धिगिदं वक्रं विधिक्रीडितम् ॥२५३॥ - -सुभाषितकौस्तुभ ५३

कोकिल, रसविदः तावकम् कर्णामृतम् गीतम् शृण्वन्ति। (किन्तु) ते (तुभ्यम्) किञ्चिद् नो वितरन्ति । (त्वम्) स्वयम् तरुदलैः एव जीवसि। काकाः तु कर्णायुः हरम् विरुतम् उद्गिरन्ति । प्राज्ञाः तेभ्यः (श्राद्धे) बलिम् हरन्ति। हन्त, धिग् इदम् वक्रम् विधिक्रीडितम् ॥

Oh Cuckoo, people with good taste listen to your (beautiful) singing, which is like nectar to their ears. However, they do not give you anything back in return. You survive just on tree shoots alone. On the other hand, crows give out a shrill cry, which kills their ears. Even then, intelligent people give them oblations (of rice at funeral rites). Alas! This crooked game of destiny is shameful indeed!

कोकिल- cuckoo bird- पु. लिं. सं. वि. ए. व., रसविदः, ते, प्राज्ञाः & काकाः- पु. लिं. प्र. वि. ब. व. of रसविद्- connoisseur, one having taste-रस- taste, having liking- विद्- adctv- knowledgeable, conversant- रसम् वेत्ति इति- रसविद्- उपपद तत्पुरुष स., तद्- he, प्राज्ञ- intellectual, knowledgeable, understanding & काक- crow, तावकम्- adjctv- yours, कर्णामृतम्- nectar to ears- कर्ण- ear, अमृत- nectar- कर्णयोः अमृतम्- कर्णामृतम्- ष. तत्पुरुष स., गीतम्- singing, song- (गीत- क. भू. धा. वि. of गै- गायति १ ग. प. प. to sing), कर्णायुः- life of ears- कर्ण- ear, आयुस्- age, life-size- कर्णयोः आयुः- कर्णायुः- ष. तत्पुरुष स., हरम्-

depriving, taking away- (हृ- हरति १ ग. प. प.) विरुतम्- screaming, crying- (विरुत- क. भू. धा. वि. of वि+ रुद्- रोदिति २ ग. प. प. to cry), बलिम्- oblation, offering- all in न. लिं. द्वि. वि. ए. व., किञ्चिद्- (किम्+चित्)- something- नो (न +उ)- no, not, नो किञ्चिद्- nothing, इदम्- this, वक्रम्- crooked, cruel, bent, विधिक्रीडितम्- game of destiny, विधि- पु. लि.- destiny, fate, क्रीडित- play, game- क. भू. धा. वि. of क्रीड्- क्रीडति १ ग. प. प. to play, विधेः क्रीडितम्- विधिक्रीडितम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., शृण्वन्ति, वितरन्ति, उद्गिरन्ति & हरन्ति- वर्त. तृ. पु. ब. व. of श्रु- शृणोति- ५ ग. प. प. to listen, hear, वि+ तृ(दीर्घ)- to bestow, give- {तृ(दीर्घ)- तरति १ ग. प. प. to accomplish, cross}, उद्+ गृ(दीर्घ)- to discharge, eject, emit- गृ(दीर्घ)- गिरति ६ ग. प. प. to utter, call out & हृ- हरति १ ग. प. प. to convey, offer, तरुदलैः- न. लिं. तृ. वि. ब. व. of तरुदल- leaf of a tree- तरु- पु. लिं. - tree, दल- पु/न. लिं. - a small shoot or blade, petal, जीवसि- वर्त द्वि. पु. ए. व. of जीव्- जीवति १ ग. प. प. to live, to be alive, तेभ्यः- to them- पु. लिं. च. वि. ब. व. of तद्- he, हन्त- particle implies joy, surprise, grief, धिग्- an interjection of cencure- what a pity, स्वयम्- oneself, of one's own, एव- just, only, also, तु-but, on the other hand- all अव्यय s

प्रायः खलाः क्व नु न सन्ति परस्थितिघ्नाः
प्राज्ञो जनस्तु विरलोऽत्र परोपकारी ।
सर्वत्र सन्ति दृषदः चरणक्षतार्थाः
चिन्तामणिश्चिरतरं विचितोऽप्यलभ्यः ॥२५४॥ -सुभाषितकौस्तुभ ५१

खलाः परस्थितिघ्नाः प्रायः क्व नु न सन्ति ? परोपकारी प्राज्ञः जनः तु अत्र विरलः (अस्ति)।
चरणक्षतार्थाः दृषदः सर्वत्र सन्ति, (परन्तु) चिन्तामणिः, चिरतरम् विचितः अपि, अलभ्यः (भवति) ॥

Where would you not easily find wicked people, who mostly destroy lives of others? However, in this world, learned people willing to help others are indeed very few. Stones capable of hurting the feet are everywhere. However, the proverbial wish-fulfilling stone, Chintamani, even after searching forever, cannot be found.

खलाः, परस्थितिघ्नाः, चरणक्षतार्थाः - all in पु. लि. प्र. वि. ब. of खल- wicked, cruel, परस्थितिघ्न- destroying state of others- पर- adjctv- other another, स्थिति- condition, living, state, घ्न- suffix implies- one who kills, destroys (हन्-हन्ति २ ग. प. प. to strike, kill)- परस्य स्थितिः- परस्थितिः- ष. तत्पुरुष स. & परस्थितिम् हन्ति इति- परस्थितिघ्नः - उपपद तत्पुरुष स., चरणक्षतार्थ- aimed at hurting feet- चरण- foot, क्षत- adjctv- hurt, injury, अर्थ- purpose, intention- चरणयोः क्षतम्- चरणक्षतम्- ष. तत्पुरुष स. & चरणक्षतः अर्थः- चरणक्षतार्थः- कर्मधारय स., सन्ति- वर्त. तृ. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to exist, परोपकारी (परोपकारिन्)- one helping others- पर- other, another- उपकार- help, obligation- यः परेभ्य: उपकारम् करोति सः- परोपकारिन्- बहुव्रीहि स., प्राज्ञः- knowledgeable, understanding, learned, जनः-

people, person, विरलः- adjctv- rare, scarcely found, चिन्तामणिः- proverbial wish fulfilling stone, विचितः- having searched- (विचित- क. भू. धा. वि. of वि+ चि- to search, look out- चि- चिनोति- चिनुते ५ ग. उ. प. to gather, pick up, अलभ्यः- not available- न लभ्य- अलभ्य- नञ् तत्पुरुष स.- लभ्य- also लभनीय & लब्धव्य- कर्मणि वि. धा. सा. वि. of लभ्- लभते- १ ग. आ. प. to be available- all in पु. लिं. प्र. वि. ए. व., दृषदः- स्त्री. लिं. प्र. वि. ब. व. of दृषद्- stone, rock, चिरतरम्- longer time- चिर- long time, lasting, तर- is comparative suffix, प्रायः (प्रायस्)- perhaps, mostly, probably, क्व- where, नु- interrogative particle expressing doubt, न-no, not, अपि- even, also, तु- but, on the other hand, अत्र- here, in this world, सर्वत्र- everywhere, at all places- all अव्ययs

आगच्छन्ति यदृच्छयैव खलसंसर्गाः सदानर्थदाः
भूयिष्ठैर्यतनैरपि प्रियतमस्सत्सङ्गमो दुर्लभः ।
यत्नं कर्मकृतोऽनपेक्ष्य यवसोद्भेदा भवन्ति क्षितौ
आयासाः कति वा न सन्ति कृषतां सस्याङ्कुरस्यागमे ॥२५५॥ --सुभाषितकौस्तुभ ५४

सदा अनर्थदाः, खलसंसर्गाः यदृच्छया एव आगच्छन्ति। प्रियतमः सत्सङ्गमः भूयिष्ठैः यतनैः अपि दुर्लभः (भवति)। क्षितौ कर्मकृतः यत्नम् अनपेक्ष्य यवसोद्भेदाः भवन्ति। कृषताम् सस्याङ्कुरस्य आगमे आयासाः कति वा न सन्ति?

Company of always useless and wicked people happens on their own will. A contact with desirable and virtuous person is difficult even after numerous efforts. Weeds grow in farmland (earth) without any effort by the farmer. On the other hand, how much farmers' exertion is required for the sprouting of the grain?

अनर्थदाः, आयासाः, खलसंसर्गाः & यवसोद्भेदाः- all in पु. लिं. प्र. वि. ब. व. of अनर्थद- worthless, harmful- अर्थ- purpose, use, meaning- अन् अर्थ- अनर्थ- नञ् तत्पुरुष स.- अनर्थम् ददाति इति- अनर्थद- उपपद तत्पुरुष स., आयास- effort, exertion, खलसंसर्ग- company of wicked person- खलः- wicked person, संसर्ग- company, contact- खलानाम् संसर्ग- खलसंसर्गः- ष. तत्पुरुष स.& यवसोद्भेद- growth of weeds- यवस- grass, weed उद्भेद- growth, break out, manifestation- यवसानाम् उद्भेदः- यवसोद्भेदः- ष. तत्पुरुष स., यदृच्छया- स्त्री. लिं. तृ. वि. ए. व. of यदृच्छा- of its own, chance, self-will, प्रियतमः- most beloved or desired- प्रिय- beloved, तम- suffix for superlative degree, सत्सङ्गमः- company of noble- सत्- noble, good, सङ्गमः- confluence, company- सताम् सङ्गमः- सत्सङ्गमः- ष. तत्पुरुष स. & दुर्लभः- difficult to get- दुःखेन लभते इति- दुर्लभः- उपपद तत्पुरुष स. all in पु. लिं. प्र. वि. ए. व., भूयिष्ठैः & यतनैः- तृ. वि. ब. व. of भूयिष्ठ - adjctv- most, numerous, great & यतन- effort, exertion, क्षितौ- स्त्री. लि. स. वि. ए. व. of क्षिति- Earth, कर्मकृतः- पु. लि. ष. वि. ए. व. of कर्मकृत्- worker, toiler- कर्मन्- न. लिं.- work, effort- कर्म करोति इति- कर्मकृत्- उपपद तत्पुरुष स., यत्नम्- न.

लि. द्वि. वि. ए. व. of यत्न- effort, exertion, अनपेक्ष्य- without care or minding- अन् अपेक्ष्य- नञ् तत्पुरुष स.- अपेक्ष्य- also अपेक्षितव्य & अपेक्षणीय- कर्मणि वि. धा. सा. वि. of अप+ ईक्ष्- to desire, want, to look to- (ईक्ष्- ईक्षते १ ग. आ. प. to see, look)- कृषताम्- पु. लिं. ष. वि. ब. व. of कृषत्- farmer, one who ploughs- (कृष्- कर्षति- १ ग. प. प. to plough), सस्याङ्कुरस्य- पु/न. लिं. ष. वि. ए. व. of सस्याङ्कुर- sprout of a plant- सस्य- plant, corn, grain, अङ्कुर- sprout, shoot- सस्यस्य अङ्कुरः- सस्याअङ्कुरः- ष. तत्पुरुष स., आगमे- स. वि. ए. व. of- आगम- arrival, appearing- आ+गम्- to arrive), कति- pronominal adjctv- how many, आगच्छन्ति, भवन्ति & सन्ति- वर्त. तृ. पु. ब. व. of आ+ गम्- to arrive, to attain, reach- (गम्- गच्छति १ ग. प. प. to go), भू- भवति १ ग. प. प. to be, to exist & अस्-अस्ति २ ग. प. प. to be, to exist, सदा- always, daily, regularly, अपि- also, even, वा- and, or, एव- just alone, only, न- no, not- all अव्ययs

सुधापृषतसोदरैरपि सुधीजनाह्लादनैः न
रञ्जयितुमीष्महे नरमपण्डितं भाषितैः।
कलानिधिशिलाद्रवीकृतिचणैरपि त्विट्कणैः
चिरेण दृषदन्तरे दिशति किं द्रवं चन्द्रमाः॥२५६॥ --सुभाषितकौस्तुभ ७

(वयम्) सुधीजनाह्लादनैः, सुधापृषतसोदरैः भाषितैः अपि न अपण्डितम् नरम् रञ्जयितुम् ईष्महे। किम् चन्द्रमाः त्विट्कणैः कलानिधिशिलाद्रवीकृतिचणैः अपि चिरेण दृषदन्तरे द्रवम् दिशति?

We do not desire to delight an ignorant person by joyous talks of scholars, which are akin to drops of nectar. Would the Moon, with its particles of rays that are renowned for making moonstone ooze out, can make an ordinary stone ooze out, even after long period? (Proverbial moonstone is said to ooze out under moonlight)

सुधीजनाह्लादनैः, सुधापृषतसोदरैः, भाषितैः, त्विट्कणैः & कलानिधिशिलाद्रवीकृतिचणैः all in पु/न. लिं. तृ. वि. ब. व. of सुधीजनाह्लादन- delighting the learned people- सु- अव्यय- good, धीः- intellect, जन- people, आह्लादन- gladdening, pleasing- (आ+ ह्लाद्,१ ग. आ. प. प. to delight)- सुभगः धीः- सुधीः & सुधीः जनः- सुधीजनः- both- समा. प्रादितत्पुरुष स., सुधीजनस्य आह्लादनम्- सुधीजनाह्लादन- ष. तत्पुरुष स., सुधापृषतसोदर- like that of nectar drop- सुधा- स्त्री. लिं- nectar, ambrosia, पृषत्- न. लिं- drop, सोदर- uterine brother- सुधायाः पृषत्- सुधापृषत्- ष. तत्पुरुष स., सुधापृषतः इव सोदरः- सुधापृषतसोदरः- उपमानपूर्वपद कर्मधारय स, भाषित- speech, talk- क. भू. धा. वि. of भाष्- भाषते १ ग. आ. प. प.- to talk, speak, त्विट्कण- particles of ray- त्विट् (त्विष्- स्त्री. लिं.)- light, lustre, कण- grain, small particle- त्विषः कणम्- त्विट्कणम्- ष. तत्पुरुष स. & कलानिधिशिलाद्रवीकृतिचण- renowned for making moonstone ooze- कला- a digit of the moon, निधि- treasure, source, शिला- stone, द्रवीकृति- act of oozing- (द्रवीकृ- to make one ooze- ८ ग. उ. प.), चण- adjctv- renowned,

skilled- कलायाः निधिः- कलानिधिः- moon, कलानिधेः शिला- कलानिधिशिला, कलानिधिशिलायाः द्रवीकृतिः- कलानिधिशिलाद्रवीकृतिः - all ष. तत्पुरुष स. & कलानिधिशिलाद्रवीकृतिषु चणः- कलानिधिशिलाद्रवीकृतिचणः - स. तत्पुरुष स., अपण्डितम् नरम् & द्रवम्- all पु. लिं. द्वि. वि. ए. व. of अपण्डित- ignorant, stupid - न पण्डित- नञ् तत्पुरुष स., नर- man, person & द्रव- liquid, रञ्जयितुम्- प्रयोजक हेत्वार्थ तुमन्त धा. सा. अव्यय of रञ्ज्- रञ्जयति- ते- to please, gratify- १ & ४ उ. प., ईष्महे- वर्त. प्र. पु. ब. व. of ईष्- ईषति- ते १ ग. उ. प. to look, give, see, चन्द्रमाः- पु. लिं. प्र. वि. ए. व. of चन्द्रमस्- Moon, चिरेण- तृ. वि. ए. व. of चिर- long, दृषदन्तरे- स. वि. ए. व. of दृषदन्तर- other stone- दृषद्- stone, rock, अन्तर- different, another- दृषद् अन्तरम्- दृषदन्तरम्- समा. प्रादितत्पुरुष स.,दिशति- वर्त. तृ. पु. ए. व. of दिश्- ६ ग. उ. प. to give, grant, permit, किम्- a particle interrogation, अपि-also, even, न- no, not- all अव्ययs

विदग्धव्याहारैर्न जडमतिरानन्दति मनाक् अनालापज्ञानां न च वचनतः खेदमयते ।
न विन्दत्यानन्दं जरठवृषभश्चन्दनरसैरसौ पङ्कालेपैरपि विषादं न जुषते ॥२५७॥
-सुभाषितकौस्तुभ ४

जडमतिः विदग्धव्याहारैः न मनाक् आनन्दति। अनालापज्ञानाम् वचनतः न च खेदम् अयते।
जरठवृषभः चन्दनरसैः आनन्दम् न विन्दति। असौ पङ्कालेपैः अपि विषादम् न जुषते ॥

A stupid person does not appreciate even little bit of scholarly talk. He is neither hurt by the speech of bad speakers. An old bullock does not enjoy application of sandal paste. Neither is it bothered with smearing of the mud.

जडमतिः - dull-headed, stupid, जड- slow, heavy, मतिः- स्त्री. लि.-mind, thinking- जडा मतिः यस्य सः- जडमतिः-बहुव्रीहि स., जरठवृषभः- old bullock- जरठ- adjctv- old, aged, hard, वृषभः- bull, ox- जरठः वृषभः - कर्मधारय स., असौ (अदस्)- that, he- all in पु. लिं. प्र. वि. ए. व., विदग्धव्याहारैः, चन्दनरसैः & पङ्कालेपैः- पु/न. लिं. तृ. वि. ब. व. of विदग्धव्याहार- a scholarly talk- विदग्ध- learned, scholar, व्याहार- talk, speech- विदग्धः व्याहारः- कर्मधारय स., चन्दनरस- sandal essence- चन्दन- sandal, रस- juice, essence- चन्दनस्य रसः- चन्दनरसः ष. तत्पुरुष स. & पङ्कालेप- a coat of mud- पङ्क- mud, mire, आलेप- smearing, coating- पङ्कस्य आलेप- पङ्कालेपः, अनालापज्ञानाम्- पु. लिं. ष. वि. ब. व. of अनालापज्ञ- one who does not know how to talk, a bad speaker; आलाप- talk, speech, अन् आलाप- bad talk, wrong speech- नञ् तत्पुरुष स., ज्ञ- suffix implies- knowing, good at, वचनतः- by the talk, from the speech- वचन- talk, speech- तः (तस्)- suffix implies by, from, towards, खेदम्, आनन्दम् & विषादम्- पु/न. लिं. द्वि. वि. ए. व. of खेद- sorrow, pain, आनन्द- happiness, joy & विषादम्- regret, grief, आनन्दति, अयते, विन्दति & जुषते- वर्त. तृ. पु. ए. व. of आ+ नन्द्- to be glad, happy- (नन्द्- नन्दति १ ग. प. प. to be pleased), अय्- १ आ. प. to go, appear, get, विद्- ६ ग.

उ. प. to get obtain & जुष्- ६ ग. आ.प. to be pleased satisfied, मनाक्- little, small, न मनाक्- not even little, च-and, अपि- even, also, and- all अव्ययs

अत्यद्भुतानामनभिज्ञगोष्ठ्यामस्ति प्रशस्तिर्न कवीन्द्रवाचाम्।
मण्डूकसंघे मधुरापि सा किम् मयूरगीतिर्बहुमानमेति ॥२५८॥ -सुभाषितकौस्तुभ ६

अत्यद्भुतानाम् कवीन्द्रवाचाम् अनभिज्ञगोष्ठ्याम् प्रशस्तिः न अस्ति। किम्, मण्डूकसंघे मयूरगीतिः, मधुरा अपि सा, बहुमानम् एति?

There is no appreciation for wonderful talks of the great scholars in the assembly of the stupid people. Does singing of a peacock, even if it is melodious, get any recognition in a group of frogs?

अत्यद्भुतानाम् & कवीन्द्रवाचाम्- ष. वि. ब. व. of अत्यद्भुतः- पु. लि.- extraordinary, very great- अति- अव्यय-very, exceedingly, अद्भुत- adjctv- wonderful, marvellous- अति अद्भुतः यः सः - बहुव्रीहि स. & कवीन्द्रवाच्- talks of the great scholars/ poets, कविः- poet, scholar, इन्द्रः- lord, master, king, वाच्- स्त्री. लिं- speech, talk, कविषु इन्द्रः- कवीन्द्रः- स. तत्पुरुष स. & कवीन्द्रस्य वाक्- कवीन्द्रवाच्- ष. तत्पुरुष स., अनभिज्ञगोष्ठ्याम् & मण्डूकसंघे- स. वि. ए. व. of अनभिज्ञगोष्ठि/ष्ठी- assembly of stupid people- अभि+ ज्ञ- अभिज्ञ- clever, well acquainted- अन् अभिज्ञ- अनभिज्ञ- पु. लिं.- Stupid, गोष्ठि/ष्ठी- स्त्री. लिं- assembly, conversation- अनभिज्ञानाम् गोष्ठी- अनभिज्ञगोष्ठी & मण्डूकसंघ- association of frogs- मण्डूकः- पु. लिं.- frog, संघः- पु. लिं- मण्डूकानाम् संघः- मण्डूकसंघः- both- ष. तत्पुरुष स., प्रशस्तिः- praise, appreciation, मधुरा- sweet, pleasant, सा (तद्)- she & मयूरगीतिः- singing of a peacock- मयूरः- peacock, गीतिः- singing, song- मयूरस्य गीतिः- मयूरगीतिः -ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., अस्ति & एति- वर्त. तृ. पु. ए. व. of अस्- २ ग. प. प. to be, to exist & इ- २ ग. प. प. to go, reach, acquire, बहुमानम्- पु. लिं. द्वि. वि. ए. व. of बहुमानः- great respect, high esteem, किम्- interrogative particle, न-no, not, अपि-also, even-all अव्ययs

धनाय वैद्यः कुरुते चिकित्सां, विप्रः पठत्यत्र धनाय मन्त्रान्।
धनाय खेलत्यहिना च कश्चित्, सर्वं धनार्थं ननु नागराज ॥२५९॥

वैद्यः धनाय चिकित्साम् कुरुते। विप्रः अत्र धनाय मन्त्रान् पठति। कश्चित् धनाय अहिना च खेलति। सर्वम् धनार्थम् ननु (भवति) ॥ नागराज

A physician (doctor) gives his treatment for money; a priest says his hymns (Mantras) for money. Somebody (a snake charmer) plays with a snake for money. Is it not everything for earning money only? So says Nagaraj.

वैद्यः- physician, doctor, विप्रः- a priest, brahmin & कश्चित् (कः +चित्)- someone- all in पु. लिं. प्र. वि. ए. व., धनाय- न. लिं. च. वि. ए. व. of धनम्- wealth, money, चिकित्साम्- स्त्री. लिं. द्वि. वि. ए. व. of चिकित्सा- medical treatment, healing, मन्त्रान्- पु. लिं. द्वि. वि. ब. व. of मन्त्रः- vedic hymn, sacred prayer, कुरुते, पठति & खेलति- all in वर्त. तृ. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, perform, make, पठ्- १ ग. प. प. to read, recite & खेल्- १ ग. प. प. to play, shake, अहिना- पु. लिं. तृ. वि. ए. व. of अहिः- serpent, snake, सर्वम् & धनार्थम्- both- न. लिं. प्र. वि. ए. व. of सर्व- pronominal adjctv- all, entire & धनार्थ- धन money, wealth, अर्थ- purpose, reason, meaning- धनस्य अर्थम्- धनार्थम्- ष. तत्पुरुष स., न +नु- isn't it? न- no, not & नु- a particle having interrogative implying doubt, uncertainty, अत्र- here, in this place, च- and- all अव्ययs, नागराज- name of the author

धर्मं धनं च धान्यं च गुरोर्वचनमौषधम्।
सुगृहीतं च कर्तव्यमन्यथा तु न जीवति ॥२६०॥ -चाणक्यनीतिदर्पण अ-१४, श्लो. १९

धर्मम्, धनम् च धान्यम् च गुरोः वचनम्, औषधम् च (इति मनुष्यस्य) सुगृहीतम् कर्तव्यम् (अस्ति)। अन्यथा तु (सः) न जीवति । (तस्य जीवनम् दुष्करम् भवति)।

A man should preserve his right way of living (धर्म) and protect his wealth, food, teacher's teaching and essential medicines. Without these, he will not live. (His survival will be difficult.)

धर्मम्- prescribed codes of conduct, religion, धनम्- wealth, money, धान्यम्- grain, वचनम्- advice, teaching, औषधम्- medicine, सुगृहीतम्- well possessed, stored- सु-अव्यय- suffix implies good, well, गृहीत- held, possessed, controlled- क. भू. धा. वि. of ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. प. to seize, hold, take hold of, कर्तव्यम्- required to be done- (कर्तव्य also करणीय, कार्य & कृत्य- कर्मणि वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make)- all in न. लिं. प्र. वि. ए. व., गुरोः- पु. लिं. ष. वि. ए. व. of गुरु- teacher, father, elder, जीवति- वर्त. तृ. पु. ए. व. of जीव्- १ ग. प. प. to be alive, live, अन्यथा- otherwise, or else, तु- but, as to, on the contrary, च- and, न- no, not- all अव्ययs

अस्य दग्धोदरस्यार्थे किं न कुर्वन्ति पण्डिताः।
वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे ॥२६१॥ -महासुभाषितसंग्रह

अस्य दग्धोदरस्य अर्थे पण्डिता: किम् न कुर्वन्ति? (ते) वाग्देवीम्,वानरीम् इव, गृहे गृहे नर्तयन्ति॥

What Scholars do not do to feed this wretched stomach? They make the Goddess of Education (their own knowledge) dance like a (female) monkey from house to house !

पण्डिताः- पु. लिं. प्र. वि. ब. व. of पण्डित- scholar, learned, expert, अस्य & दग्धोदरस्य- both न. लिं. ष. वि. ए. व. of इदम्- this, it & दग्धोदरम्- wretched stomach- दग्ध- burnt, wretched, accursed, famished- क. भू. धा. वि. of दह्- दहति १ ग. प. प. to burn, destroy, consume, उदरम्- stomach, belly- दग्धम् उदरम्- दग्धोदरम्- विशेषणपूर्वपद कर्मधारय स., अर्थे & गृहे- both न. लिं. स. वि. ए. व. of अर्थ- purpose, for the sake, cause & गृह- house, abode, गृहे गृहे- from house to house, कुर्वन्ति- प. प. वर्त. तृ. पु. ब. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, नर्तयन्ति- प्रयोजक वर्त. तृ. पु. ब. व. of नृत्- नृत्यति- ४ ग. प. प. to dance, वाग्देवीम् & वानरीम्- both in स्त्री. लिं. द्वि. वि. ए. व. of वाग्देवी- Goddess of learning- वाच्- स्त्री. लिं- speech, talk, देवी- Goddess- वाचः देवी - वाग्देवी- ष. तत्पुरुष स. & वानरी- female monkey, इव- like similar to, किम्- interrogative paticle- what, न-no not- all अव्ययs

किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥२६२॥ – भामिनीविलास

अर्णव, यद्, (तव) तावकम् सलिलम् तृषितानाम् वदनम् अपि न प्रयाति, (तद्) एतैः (तव) रत्नैः किम् खलु? पुनः किं ते अभ्रायितेन वपुषा?

Oh Ocean, your water does not even reach the mouth of thirsty people, so, what really, is the use of your gems and what use is your body covered with beautiful sky?

अर्णव- ocean, sea- पु. लिं. प्र. वि. ए. व., एतैः & रत्नैः- न. लिं. तृ. वि. ब. व. of एतद्- this & रत्न- gem, jewel, ते (तव)- yours- ष. वि. ए. व. of युष्मद्- you, अभ्रायितेन & वपुषा- both in न. लिं. तृ. वि. ए. व. of वपुस्- body, beautiful form & अभ्रायित- one that is covered with sky (cloud)- अभ्रम्- cloud, sky, atmosphere- अभ्रायित- क. भू. धा. वि. of अभ्रायति- ते- covers with sky/clouds- ना. सा. धा. of अभ्रम्, तावकम् & सलिलम्- both in न. लिं. प्र. वि. ए. व. of तावक- adjctv- yours, thy & सलिल- water, तृषितानाम्- पु. लिं. ष. वि. ब. व. of तृषित- thirsty- क. भू. धा. वि. of तृष्- तृष्यति ४ ग. प. प. to be thirsty, वदनम्- न. लिं. द्वि. वि. ए. व. of वदन- mouth, face, प्रयाति- वर्त. तृ. पु. ए. व. of प्र+ या- to reach, go -(या- याति २ ग. प. प. to go, proceed), पुनः (पुनर्)- again, यद्- as, because, किम्- interrogative particle- what, which, खलु- indeed, surely, अपि- even, also, न-no, not- all अव्ययs

क्षुत्क्षामाः शिशवः शवा इव भृशं मन्दाशयाः बान्धवाः
लिप्ता जर्जरकर्करी जतुलवैर्नो मां तथा बाधते।
गेहिन्याः त्रुटितांशुकं घटयितुं कृत्वा सकाकु स्मितं
कुप्यन्ती प्रतिवेशिलोकगृहिणी सूचीं यथा याचिता ॥२६३॥

शिशवः क्षुत्क्षामाः शवाः इव (सन्ति)। बान्धवाः भृशम् मन्दाशयाः (सन्ति) । जर्जरकर्करी जतुलवैः लिप्ता (अस्ति) । (एतद् सर्वम्) माम् तथा नो बाधते, यथा गेहिन्याः त्रुटितांशुकम् घटयितुम् सूचीम् याचिता, सकाकु स्मितम् कृत्वा, कुप्यन्ती प्रतिवेशिलोकगृहिणी (बाधते) ॥
(This lamenting of stark poor person)

My children are like corpses due to starving. All my relations are totally neglecting me (are mean minded). Bits of lac seal our leaking water pot somehow. These things do not torment me as much as our neighbourhood woman giving out humiliating smile of denial, when my wife approaches her to ask for a needle to mend her torn dress.

शिशवः, क्षुत्क्षामाः ,शवाः, बान्धवाः & मन्दाशयाः- पु. लिं. प्र. वि. ब. व. of शिशु- child, क्षुत्क्षाम- afflicted by hunger- क्षुध्- स्त्री. लिं.- hunger, क्षाम- adjctv- scorched, emaciated, lean- क्षुधा क्षामः यः सः- क्षुत्क्षामः- बहुव्रीहि स., शव- corpse, dead body, बान्धव- relative, brother & मन्दाशय- mean-minded, disinterested- मन्द- adjctv- slow, lazy, आशय- interest, meaning, feeling- मन्दः आशयः यस्य सः- मन्दाशयः- बहुव्रीहि स., जर्जरकर्करी- जर्जर- adjctv- worn out, old, कर्करी- water-jar having hole- जर्जरा कर्करी- जर्जरकर्करी- विशेषणपूर्वपद कर्मधारय स., लिप्ता- smeared, coated- (लिप्त- क. भू. धा. वि. of लिंप्- लिंपति- ते ६ ग. उ. प. to smear, coat), कुप्यन्ती- angry- कुप्यन्- वर्त. का. वा. धा. सा. वि. of कुप्- कुप्यति ४ ग. प. प. to be angry, प्रतिवेशिलोकगृहिणी- a woman residing in a neighbouring house- प्रति- अव्यय- near, adjacent, वेश्मन्- न. लिं.- house, लोक- people, person, गृहिणी- house-wife, lady in-charge of the house- वेश्मनः प्रतिगतम्- प्रतिवेशि- अव्ययीभाव स.- प्रतिवेश्मनः लोक- प्रतिवेशिलोकः & प्रतिवेशिलोकस्य गृहिणी- प्रतिवेशिलोकगृहिणी- both ष. तत्पुरुष स., याचिता- one who begged, asked for (याचित- क. भू. धा. वि. of याच्- याचति- १ ग. प. प. to beg, solicit)- all in स्त्री. लिं. प्र. वि. ए. व., जतुलवैः- तृ. वि. ब. व. of जतुलव- जतु- न. लिं- lac, लव- bit, fragment- जतुनः लवम्- जतुलवम्- ष. तत्पुरुष स., माम्- to me- द्वि. वि. ए. व. of अस्मद्- I, we, बाधते- वर्त. तृ. पु. ए. व. of बाध्- १ ग. आ. प. to torment, disturb, गेहिन्याः- स्त्री. लिं. ष. वि. ए. व. of गेहिनी- house-wife, lady in-charge of the house, घटयितुम्- to mend, stich- हेत्वार्थ तुमन्त धा. सा. अव्यय of प्रयोजक of घट्- घटयति- ते- to unite, join- (घट्- घटति १ ग. प. प. to strive, exert), कृत्वा- after doing- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, त्रुटितांशुकम् - torn dress- त्रुटित- torn- क. भू. धा. वि. of त्रुट्- त्रुटति, त्रुट्यति- ६, ४ ग. प. प. to tear, snap, अंशुकम्- cloth, a garment in general- त्रुटितम् अंशुकम्- त्रुटितांशुकम्- विशेषणपूर्वपद कर्मधारय स., सकाकु- showing denial, with murmuring- स- अव्यय- together, with- काकु- स्त्री. लिं- a word of negation, murmuring, muttering- काकुना सहितम्- सकाकु- अव्ययीभाव स. & स्मितम्- smile- (स्मित- क. भू. धा. वि. of स्मि- स्मयते १ ग. आ. प. to smile)- all in न. लिं. द्वि. वि. ए. व., सूचीम्- स्त्री. लिं. द्वि. वि. ए. व. of सूची- needle, इव- like, similar to, भृशम्- very much, repeatedly, often, तथा- like, as, यथा- like which, नो (न+उ)- not- all अव्ययs

अन्तःसारविहीनानामुपदेशो न जायते।
मलयाचलसंसर्गान्न वेणुश्चन्दनायते॥२६४॥ - चाणक्यनीतिदर्पण अ-१० श्लो-८

अन्तःसारविहीनानाम् उपदेशः न जायते। वेणुः, मलयाचल- संसर्गात् न चन्दनायते॥

Giving good counsel to those without inherent capacity to grasp it, does not produce any result. Just being on Malaya mountain (full of sandalwood trees), a Bamboo tree does not get the fragrance of sandalwood.

अन्तःसारविहीनानाम्- पु. लिं. ष. वि. ब. व. of अन्तःसारविहीन- one who is devoid of inborn capacity of grasping- अन्तः (अन्तर्)- अव्यय- inborn, internally, within, सार- essence, genuine, strong, substance, विहीन- devoid of, without- क. भू. धा. वि. of वि+ हा- to be without- (हा- जहाति- २ ग. प. प. to abandon, leave)- सारम् अनतर्गतम्- अन्तःसारम्- अव्ययीभाव स. & अन्तःसारात् विहीनः- अन्तःसारविहीनः- पं. तत्पुरुष स., उपदेशः- good counselling, advice, teaching & वेणुः- bamboo, reed -both in पु. लिं. प्र. वि. ए. व., जायते & चन्दनायते- वर्त. तृ. पु. ए. व. of जन्- ४ ग. आ. प. to happen, become, produce, grow, take place, to be born & ना. सा. धा. ofचन्दन- sandalwood, मलयाचलसंसर्गात्- पु/न. लिं. पं. वि. ए. व. of मलयाचलसंसर्ग- contact or association with Malay mountain- मलय- name of a mountain, अचल- mountain, संसर्ग- contact, association, company; & मलयाचलस्य संसर्गः- मलयाचलसंसर्गः- ष. तत्पुरुष स, न- no, not

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥२६५॥ - पञ्चतंत्र मित्रभेद; पा.भे. रोगं = व्याधिं

यः, (तस्य) शत्रुम्, रोगम् (व्याधिम्) च जातमात्रम् प्रशमम् न नयेत्, सः, महाबलः अपि, तेन एव (शत्रुणा, रोगेण/ व्याधिना च), वृद्धिम् प्राप्य, हन्यते॥

One who does not destroy his enemy and disease at the very beginning, will himself be destroyed by it after it grows, however strong he may be.

यः, सः & महाबलः- पु. लिं. प्र. वि. ए. व. of यद्- who, तद्- he & महाबलः- one who is strong, महत्- great, very much, बलम्- strength, ability- महत् बलम्- महाबलम्- कर्मधारय स., जातमात्रम्, शत्रुम्, रोगम्, व्याधिम्, प्रशमम् & वृद्धिम्- all in - पु. लिं. द्वि. वि. ए. व. of जातमात्र- at birth, at very beginning - जात- born, caused, produced- (क. भू. धा. वि. of जन्- जायते ४ ग. प. प.), मात्र- when used with क. भू. धा. वि. implies: merely, as soon as, no sooner than, शत्रु- enemy, adversary, रोग/ व्याधि- disease, sickness, ailment- , प्रशम- cessation, curing, mitigation- (प्र+ शम्- to extinguish, stop, sooth- शाम्यति ४ ग. प. प.) & वृद्धि- growth,

increase - (वृध्- वर्धते १ ग. आ. प. to grow, increase), नयेत्- प. प. विध्यर्थ तृ. पु. ए. व. of नी- नयति- ते १ ग. उ. प. to lead, direct, take, तेन- by him/it- पु/न. लिं. तृ. वि. ए. व. of तद्- he, it, प्राप्य- after attaining, getting- पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्र+ आप्- ५ ग. प. प. to get, हन्यते- gets killed, destroyed- कर्मणि प्रयोग वर्त. तृ. पु. ए. व. of हन्- हन्ति २ ग. प. प. to strike